॥ मांडूकश्रीनिवासतीर्थीयप्रारंभः ॥

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ ॐ चक्षुरादिस्थितोयोहिजाग्रदादिप्रवर्तकः । विश्वादिरूपीतंव्यासंवंदेहंमध्ववल्लभं ॥ १ ॥ श्रीमदानंदतीर्थार्याञ्जयार्यादींश्चसन्मुनीन् । नमामिपरयाभक्त्यास्मृत्यासर्वेष्टदायकान् ॥ २ ॥ येनवेदांतभाष्याणिविवृतानिमहात्मना । तंवंदेव्यासतीर्थाख्यंजयराजनिषेवकं ॥ ३ ॥ प्रणम्ययादवाचार्यगुरूणांपादपंकजे । मांडूकोपनिषद्भाष्यविवृतिःक्रियतेमया ॥ ४ ॥ इहामुत्रफलभोगविरक्तस्यशमदमादिमतोमुमुक्षोरधिकारिणःआत्यंतिकानिष्टनिवृत्तीष्टप्राप्त्यर्थंतत्साधनभगवत्स्वरूपप्रतिपादनायप्रवृत्तापीयंमांडूकोपनिषदन्यैरन्यथाव्याख्यातत्वेनतज्ज्ञापनासमर्थेतिमन्यमानोभगवानाचार्यस्तांयथावद्याचिख्यासुरभीष्टसमाप्त्याद्युपायतयाशिष्टाचारपरंपरावगतमेतदुपनिषत्प्रतिपाद्यगुणवद्भगवत्स्तुतिनतिरूपंमंगलंगुणप्रधानभावेनशिष्यशिक्षार्थमादावुपनिबध्नाति ॥ पूर्णेति ॥ अहंविष्णुंविश्वादिरूपिणंनित्यंसदावंदइतिक्रियाकारकसंबंधः । नित्यंवंदइत्यनेन नममनारायणवंदनंप्रत्यूहविरहादिप्रयोजनोद्देशेन किंतुस्वभावतएवेतिसूचयति । पूर्वटीकाकारास्तुनित्यत्वस्यभगवद्विशेषणत्वमंगीकृत्याव्ययपदेनपुनरुक्तिपरिहारायनित्यमनादिं अव्ययंनाशरहितमितिवा । नित्यं स्वरूपतः । अव्ययंदेहहान्यादिरहितमितिवार्थः । अतोनपुनरुक्तिरितिव्याचक्षते । नन्वदेहश्चेदसर्वज्ञःशिलाकाष्ठादिवत्सदा । देहीचेदंतवानेवयज्ञदत्तनिदर्शनादितिशंकायांद्वितीयंपक्षमंगीकृत्यतत्रोक्तदोषपरिहारायोक्तं पूर्णानंदज्ञानशक्तिस्वरूपमव्ययमिति । पूर्णानंदज्ञानशक्तयएवस्वंस्वकीयंरूपंदेहोयस्यासौतथोक्तः । अतएवअव्ययंनाशशून्यं । कर्मापादितजडदेहस्यैव

भा० । पूर्णानंदज्ञानशक्तिस्वरूपंनित्यमव्ययं । चतुर्धासर्वभोक्तारंवंदेविष्णुंपरंपदं ।

तदापादकत्वात् । विष्णुदेहस्यचातथात्वादितिभावः । अत्रानंदस्यपूर्णत्वंनाम दुःखासंभिन्नत्वमपरिच्छिन्नत्वंच । ज्ञानस्यपूर्णत्वं स्वपरगताशेषविशेषविषयकत्वं । शक्तेःपूर्णत्व मप्रतिबद्धत्वमितिद्रष्टव्यं । वक्ष्यतेच आनंदमयइतिपूर्णानंदत्वं । एषसर्वज्ञइति पूर्णज्ञानत्वं।एषयोनिःसर्वस्येतिसर्वस्रष्टृत्वोक्त्याऽर्थात्पूर्णशक्तित्वं।प्रभुरव्ययइतिप्रणवोव्ययइत्यव्ययत्वंचेतिद्रष्टव्यं ॥ चतुर्धेति ॥ विश्वादिरूपेणचतुर्धानेत्रादिस्थानेषुस्थित्वास्थूलादिसर्वविषयभोक्तारमित्यर्थः । वक्ष्यतेचैतत्स्थूलभुक्प्रविविक्तभुगानंदभुगिति । ननुतुरीयस्यभोगानुक्तेश्चतुर्धासर्वभोक्तारमितिकथमुक्तमितिचेन्न । आनंदभुगित्यस्यतुरीयेपिग्राह्यत्वादित्याशयात् । नन्वेवंभूतस्य विष्णोर्वेदनेनकिंफलमित्याशंकायांतत्प्राप्तिरेवेत्याशयेनोक्तं ॥ पदमिति ॥ पद्यतइतिपदं प्राप्यमित्यर्थः । अर्चिरादेर्मार्गस्यकार्य ब्रह्मणश्चज्ञानिप्राप्यत्वात्कथंविष्णोरेवपदत्वमित्यतउक्तं ॥ परमिति ॥ एतदपितुरीयंपदमश्नुतइत्यनेनोक्तं । अनेनविश्वादिरूपीवि ष्णुर्विषयः । तत्प्राप्तिःप्रयोजनं । योग्यस्तदिच्छुरेवाधिकारी । यथायोग्यंसंबंधइतिसूचितं । तेननिर्विषयत्वादिप्रयुक्तानारंभणी यत्वशंकानिरस्तेतिज्ञातव्यं । ननुयोहवाअविदितार्षेछंदोदैवतब्राह्मणेनमंत्रेणयजतियाजयतिवाध्यापयतिवास्थाणुंवर्छतिगर्तेंवाप द्यतेप्रवामीयतेपापीयान्भवतीतिश्रुतौऋष्याद्यज्ञात्वाविद्याभ्यासिनोऽनर्थोक्तेस्तत्परिज्ञानमावश्यकं । तत्रकियतोभागस्यछंदोब द्धत्वंनास्त्येव । तदुपनिबद्धत्वेप्यक्षरपरिगणनयाऽनुष्टुप्त्वावगमसंभवाद्ब्राह्मणपदोपलक्षितार्थज्ञानस्यव्याख्यानादेवसिद्धेःऋषि देवतेआहभगवान्भाष्यकारः ॥ मंडूकरूपिणावरुणेनेत्यादिना ॥ नन्वस्याउपनिषदोवरुणऋषिरित्ययुक्तं । मांडूकोपनिष

भा० । मंडूकरूपिणावरुणेनचतूरूपोनारायणोत्रस्तूयते ।

दितिप्रसिद्धिपर्यालोचनयैवमंडूकनामाकश्चिदृषिरितिप्रतीतेरित्यतउक्तं॥ मंडूकरूपिणेति॥ अत्रजाग्रदाद्यवस्थाभेदभिन्नोविश्वा दिरूपोजीवएवोच्यतइत्यपव्याख्याननिरासायनारायणइत्युक्तं । नन्वत्रविश्वादीनांचतुर्णांप्रतिपाद्यत्वाद्भगवतश्चैकमेवाद्वितीय मित्येकत्वोक्तेःकथमेतदित्यतउक्तं॥ चतूरूपइति॥ इममर्थंप्रमाणसंवादेनद्रढयति॥ ध्यायन्निति॥ प्रणवेन प्रणवोपक्रमयाओ मित्येतदक्षरमित्यादिकयासमग्रोपनिषदातुष्टावेत्यन्वयः। चतूरूपमितिशेषः। ओमित्येतदक्षरमिदंसर्वमितिवाक्यं ओमित्येतदक्षरं ओमित्ययंवर्णइतियथाश्रुतप्रतीतेरोंकारस्यसर्वात्मकत्वाभावेनानुपपन्नतया ॐमित्येतदक्षरप्रतिपाद्यंब्रह्मैवेदंसर्वंजगदितिपरेणव्या ख्यातं। तदसत्। विभूतिंप्रसवंत्वन्यइतिब्रह्मणःसर्वात्मकत्वस्यपूर्वपक्षत्वेनोक्तत्वात्प्रमाणविरोधाच्चेतिभावेनवाक्यभेदमंगीकृ त्योमित्येतदक्षरमितिवाक्यंतावद्व्याचष्टे॥ ओमित्युक्तमित्यादिना॥ प्रणवस्याक्षरनामकंब्रह्मैवाभिधेयमित्युक्त्वातस्यतत्रप्रवृत्तौ निमित्तंकथ्यतेतस्योपव्याख्यानंभूतंभवद्भविष्यदितीति। तदुपलक्षणपरमितिसूचनायस्वयमर्थांतरमाह॥ ओतमत्रेति॥ प्रविष्टमित्यर्थः। अवरक्षणगतिकांतिप्रवेशेत्यादिधातोःप्रवेशार्थस्यावतेःकर्मणिमनिन्प्रत्यये प्रत्ययस्यटेर्लोपेज्वरत्वरेत्यादिनोपधा कारस्यवकारस्यचोठिसवर्णदीर्घेचसतिऊम्इतिजातेसार्वधातुकार्धधातुकयोरितिगुणेचसति ॐमितिभवति। अवतिर्नामायंधातुर्ग तिकर्मानुप्रवेशनकर्माचेत्यन्यत्राप्येवमेवनिरुक्तत्वाच्च। तथाचप्रविष्टत्वमोंकारार्थः। तच्चकेनेतिकर्त्रपेक्षायांजगतोयोग्यतयासंबं

भा०। ध्यायन्नारायणंदेवंप्रणवेनसमाहितः। मंडूकरूपीवरुणस्तुष्टावहरिमव्ययमितिपाद्मे। ओमित्युक्तंतुयद्ब्रह्मतदक्षरमुदाहृतं। ओ तमत्रजगद्यस्मादोंतस्माद्भगवान्हरिः।

धः । तथाचजगताप्रविष्टत्वादोमित्युच्यते । ओतमत्रजगदित्यादितुफलितार्थकथनमितिज्ञातव्यं । ननुवाक्यभेदांगीकारोव्यर्थः । इदंसर्वमित्यनेनेदमक्षरंसर्वमितिसर्वात्मकत्वस्यैवप्रतीतेरित्यतस्तद्व्याचष्टे ॥ **तदिदमिति** ॥ तदिदमोंकारप्रतिपाद्यमक्षरनामकमेवब्रह्मगुणपूर्त्यैवसर्वमितिशब्दितमिति नसर्वाभेदेनेतियोजना । तस्योपव्याख्यानंभूतंभवद्भविष्यदितीतिवाक्येनजीवादिसाधारणंस्वरूपनित्यत्वमोंकारप्रवृत्तिनिमित्तमुच्यतइत्यन्यथाप्रतीतिनिरासायव्याचष्टे ॥ **भावीति** ॥ बहुकालीनत्वादिनानित्यत्वस्यौपचारिकत्वनिरासायसर्वदेत्युक्तमित्याहुः । वस्तुतस्तुभाविभूतभवत्कालेष्वित्यनुवादेनसर्वदेतिव्याख्यानं । तथाच सर्वदैकरूपतयानित्यइत्यर्थः । ननुभूतंभवद्भविष्यदितिश्रुतौकालत्रयसंबंधएवहरेःप्रतीयतेनतुकालत्रयकृतविकारशून्यत्वापरपर्यायं सर्वदैकप्रकारत्वमितिचेत्सत्यं । यच्चान्यत्रिकालातीतमित्यनुवादान्यथानुपपत्त्याकालत्रयकृतविकारशून्यत्वस्यात्रविवक्षणीयत्वादिति । तस्योपव्याख्यानमित्यस्यार्थइत्येषाव्याख्येति । विशेषेणाख्याव्याख्या । प्रवृत्तिनिमित्तमितियावत् ॥ १ ॥ नन्वोंकारप्रतिपाद्यस्याक्षरस्येदंसर्वमितिपूर्णत्वस्योक्तत्वात्सर्वमोंकारएवेतिव्यर्थमित्यतःप्रमाणोदाहरणेनव्याचष्टे ॥ **ओमित्याक्रियतइति** ॥ ननुकथमनेनास्यवाक्यस्यसार्थक्यमित्यतस्तन्नान्यस्यहरेःक्वचिदितिप्रमाणशेषोक्तमेवाभिप्रायंविशदयति ॥ **सर्वमिति** ॥ पूर्वंइदंसर्वमितिनिरवधारणमुक्तत्वेनभगवदन्यस्यापिपूर्णत्वंस्यादित्याशंकापरिहारायान्यस्यपूर्णत्वनिवारणंकर्तुंसर्वमोंकारएवेत्यु

भा० । तदिदंगुणपूर्त्यैवसर्वमित्येवशब्दितं । भाविभूतभवत्कालेष्वेकरूपतयाहरिः । सर्वदानित्यइत्येषाव्याख्योंकारस्यकीर्तितेतिबृहत्संहितायां । ओमित्याक्रियतेयस्मादोंकारोसावतःपरः । सर्वत्वमितिपूर्णत्वंतन्नान्यस्यहरेःक्वचिदितिनैर्गुण्ये । सर्वमोंकारएवेत्यन्यस्यपूर्णत्वनिवारणं ।

क्तमतोनवैयर्थ्यमितिभावः । एतेनसर्वमोंकारएवेति ॐकारस्यसर्वजगदात्मकत्वस्योक्तत्वात्पूर्ववाक्यार्थोपितथैवनेयइतिपरास्तं । ननुभूतंभवद्भविष्यदित्यनेनकालत्रयकृतविकारशून्यत्वापरपर्यायस्यत्रिकालातीतत्वस्योक्तत्वाद्यच्चान्यत्रिकालातीतंतदप्योंकारएवेतिव्यर्थमित्यतआह ॥ **त्रिकालातीतत्वंचेति** ॥ कालत्रयकृतविकारशून्यत्वमित्यर्थः । तथाचभूतंभवद्भविष्यदितिनिरवधारणमुक्तत्वेनान्यस्यापिकालातीतत्वंस्यादितिशंकापरिहारायत्रिकालातीतंतदप्योंकारएवेत्युक्तमतोनवैयर्थ्यमितिभावः। नन्वत्रान्यदितिविशेषणंकिमर्थंइत्यतआह ॥ **प्रकृतेरिति** ॥ चेतनप्रकृतेरित्यर्थः । अयमाशयः । भगवत्योंशब्दस्यप्रवृत्तौनत्रिकालातीतत्वंनिमित्तं । तस्यचेतनप्रकृतिसाधारणत्वेनभगवद्धर्मत्वायोगात् । अतोन्यदित्युक्तं । तथाचचेतनप्रकृत्यन्यत्वेसति त्रिकालातीतत्वंपर्यवस्यति । इदंचभगवदसाधारणमेवातिव्याप्त्यभावादिति । नन्विदंसर्वमित्युक्तत्वात्सर्वंह्येतद्ब्रह्मेतिपुनरुक्तमित्याशंकापरिहारायहिशब्दसूचितप्रमाणोदाहरणपूर्वकमवतारयति ॥ **परममित्यादिना** ॥ वृद्ध्यर्थकबृहधातुनिष्पन्नस्यब्रह्मशब्दस्यपूर्णत्वार्थकत्वादितिध्येयं । तथाचैतद्ब्रह्मोंकारप्रतिपाद्यमक्षराख्यंपरंब्रह्मसर्वपूर्णमित्येतत् हि पूर्णमदइत्यादिश्रुतिप्रसिद्धमितियोजनोक्ताभवतीतिद्रष्टव्यं । अयमात्माब्रह्मेतिवाक्यंजीवस्यब्रह्मात्मकत्वप्रतिपादनपरमितिप्रतीतिनिरासायव्याकुर्वन्नेवावतारयति ॥ **श्रीब्रह्मादीत्यादिना** ॥ आदानादिकर्तेत्यात्मशब्दार्थकथनं । आदिपदेनादनकर्तृत्वग्रहणंप्रतीयते । अनुमाने

भा० । त्रिकालातीतत्वंचतस्यैव । प्रकृतेरपित्रिकालातीतत्वंविद्यतइत्यन्यदितिविशेषणं । परमंयोमहद्ब्रह्म । तदेवब्रह्मपरमंकवीनां । पूर्णमदः पूर्णमिदमित्यादिषुप्रसिद्धंचब्रह्मणःपूर्णत्वमित्याह । सर्वंह्येतद्ब्रह्मेति । श्रीब्रह्मादिसकलदेहेषुस्थित्वाऽऽदानादिकर्तायोयंकश्चित्प्रतीयते ।

नतत्रदृष्टांतमाह ॥ जीवानामिति ॥ अस्मदादीनामित्यर्थः । हिताकरणाहितकरणाभ्यांजीवानामस्वातंत्र्यदर्शनादितिभावः । तथाचश्रीब्रह्माद्याःस्वादानादिकर्तृसापेक्षाःअस्वतंत्रत्वादस्मदादिवदित्यनुमानेनश्रीब्रह्माद्यादानादनकर्तुःकस्यचित्सिद्धत्वात्त स्यापिपूर्णत्वत्रिकालातीतत्वयोःसंभवेनातिव्याप्तिप्रसंगादोंकारएवेत्यवधारणमयुक्तमित्याशंकापरिहाराय यःश्रीब्रह्माद्यादाना दिकर्ताऽनुमानेनसिद्धःसोप्योंकारवाच्याक्षरनामकोभगवानेवनान्यः । अतःपूर्णत्वादितस्यैव नान्यस्येतिदर्शयत्ययमात्माब्रह्मे तिवाक्येनेत्यर्थः । सर्वमोंकारएवेत्यादिवाक्यचतुष्टयं सर्वमोंकारएवेत्यन्यस्येत्यादिनास्ववाक्येनव्याख्याय प्रमाणेनापिव्याख्या ति ॥ पूर्णस्त्वित्यादिना ॥ प्रकृतिंविनापरमात्मनोऽन्यत्रिकालातीतंनेत्युक्त्याऽन्यदितिविशेषणंप्रकृतिव्यावृत्त्यर्थमित्युक्तंसम र्थितंभवति । ननुतथापिप्रकृत्यन्यत्वेसतिकालत्रयकृतविकारशून्यत्वापरपर्यायकालत्रयातीतत्वंनब्रह्मणएवसंभवति कालेदिक्षु वेदेषु चातिव्याप्तेरित्यतआह ॥ कालश्चैवेति ॥ प्रकृत्यात्मानएवेतिसंबंधः । अत्रकालशब्देनतत्प्रवाहउच्यते । तस्यैवकालत्र येप्येकप्रकारकत्वात् । प्रवाहिणांनिमेषादीनांचसर्वेनिमेषाजज्ञिरइतिकालकृतविकारश्रवणात् । यथोक्तं । कालप्रवाहएवैकोनि त्योनतुविशेषवानिति । अव्याकृताकाशभागाःदिशउच्यंते । वेदाइतिपंचाशद्वर्णागृह्यंते । क्रमविशेषविशिष्टवर्णानांवेदशब्दवा च्यानांजन्यत्वेनविकारित्वादितिद्रष्टव्यं । प्रकृत्यात्मानः चेतनप्रकृत्यभिमन्यमानाः । तथाचप्रकृत्यन्यत्वविशेषणेनैवतदन्यत्व

भा० । जीवानामस्वातंत्र्यदर्शनात् । सोपिसएवेतिदर्शयति । अयमात्माब्रह्मेति । पूर्णस्तुहरिरेवैकोनान्यत्पूर्णंकदाचन । विनाचप्रकृतिंनान्यत्कालातीतंपरात्मनः । कालश्चैवदिशोवेदाःप्रकृत्यात्मानईरिताः ।

॥ ४ ॥

मप्युक्तप्रायमेवेत्याशयः । जीवस्वरूपेप्यतिव्याप्तिमाशंक्यपरिहरति ॥ अभिमानादिति ॥ देहाभिमानकृतोच्चनीचत्वादिवि कारसद्भावादितिभावः । मुक्तेष्वतिव्याप्तिमाशंक्यपरिहरति ॥ मुक्तानामिति ॥ पूर्वत्रसंसारावस्थायां । तथाचपूर्वकालकृत विकारसद्भावेनकालत्रयकृतविकारशून्यत्वंनास्तीतिनातिव्याप्तिरितिभावः । सर्वंह्येतद्ब्रह्मेत्येतद्व्याचष्टे ॥ पूर्णत्वंचेति ॥ प्रसिद्ध मितिहिशब्दार्थः । अयमात्माब्रह्मेत्येतद्व्याकरोति ॥ सोयमिति ॥ अनुपलब्धिबाधपरिहारायागोचरइत्युक्तं । गवांज्ञानानां चरोविषयोनभवतीत्यगोचरइत्यर्थः । तथाचयोग्यानुपलब्धिर्नास्तीतिभावः । सोयमस्माकमगोचरोविष्णुःरमादिगःसन्तेषांर मादीनामादानात्तथाऽदनकर्तृत्वादात्मेत्युच्यतेइतियोजना । श्रुतिं सर्वमोंकारएवेत्यादिरूपां । अस्यवाक्यस्यखिलाखिलपारि जातभेदभिन्नहरिवंशत्रयगतत्वसूचनायहरिवंशेष्वितिबहुवचनंद्रष्टव्यं ॥ २ ॥ एवंसमस्तप्रणवप्रतिपाद्यभगवदुपास्तिमभिधायेदा नींप्रणवांशाकारोकारमकारनादप्रतिपाद्यानांविश्वतैजसप्राज्ञतुरीयाणामुपास्तिं अकारःप्रथमामात्रा उकारोद्वितीयामात्रा मका रस्तृतीयामात्रा अमात्रश्चतुर्थ इत्यत्रवक्तुमादौप्रस्तावयति ॥ सोयमात्माचतुष्पादिति ॥ तत्रसोयमात्माजीवश्चतुष्पादिति अन्यथाप्रतीतिनिरासायप्रमाणेनैतद्व्याचष्टे ॥ चतुर्धेति ॥ देहइतिश्रुतौशेषोक्तिः । ननुकेतेचत्वारःपादाः कानिचतेषांस्थानानि

भा० । अभिमानात्तुजीवानांनकालातीतताभवेत् । मुक्तानामपिपूर्वत्रकालसंबंधईरितः । पूर्णत्वंचसदाविष्णोःप्रसिद्धंसर्ववेदतः । सोयंविष्णुर मात्रह्मरुद्रानंतादिगःसदा । आदानादनकर्तृत्वादात्मातेषामगोचरः । इतिमंडूकरूपीसनददर्शवरुणःश्रुतिमितिहरिवंशेषु । चतुर्धावस्थितोदेहे परमात्मासनातनः ।

कश्चव्यापारः किंविधंचरूपं किंचभोग्यमित्यतोविश्वतैजसप्राज्ञानांस्थानादीनिवक्तुंजागरितस्थानइत्यादिकोपनिषत्प्रवृत्ता । तत्रविश्वस्यस्थानादिप्रतिपादनपरंजागरितस्थानइत्यादिप्रथमःपादइत्यंतंवाक्यमप्रतीत्यन्यथाप्रतीतिनिरासायप्रमाणेनैवव्याचष्टे ॥ **वैश्वानरइत्यादिना** ॥ जागरितस्थानगः दक्षिणाक्षिरूपजागरितस्थानस्थितइत्यर्थः । दक्षिणाक्षिमुखेविश्वइतिवक्ष्यमाणत्वात् । वैश्वानरस्यरूपविशेषमाह ॥ **गजेति** ॥ बहिःप्रज्ञइत्यस्यबहिष्ठंवस्तुप्रज्ञापयतीतितथोक्तइत्यभिप्रेत्याह ॥ **निर्मातेति** ॥ जीवानांबाह्यसंवित्तेःबाह्यपदार्थविषयकज्ञानस्येत्यर्थः । अत्राप्यनुपलब्धिपरिहारायतदगोचरइत्युक्तं । गजवक्रकइत्युक्तं तत्र विशेषंवक्तुंप्रवृत्तंएकोनविंशतिमुखइत्येतत् । तद्विवृणोति ॥ **अष्टादशेति** ॥ अस्यवैश्वानरस्यमध्यममित्यनंतरंबुध्याविवेकेन वचनविपरिणामेनमुखमित्यनुवर्तते । सप्तांगइत्यस्यार्थमाह ॥ **पादाविति** ॥ द्वौपादौ हस्तिनोगजस्यकरः पुरोभागीयशुंडएकः हस्ताश्चत्वारोबाहवः । स्थूलभुगित्यस्यशुभानशुभांश्चस्थूलान्भोगान्भुंक्तइत्यन्यथाप्रतीतिनिरासायार्थमाह ॥ **स्थूलानिति** ॥ भुज्यंतइतिभोगाविषयाः । इंद्रियैः जीवेंद्रियैः । श्रोत्रंचक्षुःस्पर्शनंचरसनंघ्राणमेवच । अधिष्ठायमनश्चायंविषयानुपसेवतइति गीतावचनात् । वैश्वानरशब्दस्य अग्निर्वैश्वानरोवह्निरित्यभिधानबलेनप्रसिद्धाग्निपरत्वप्रतीतिनिरासायार्थमाह ॥ **विश्वमिति** ॥ कथमित्यतआह ॥ **सर्वेति** ॥ विश्यतेज्ञानेनप्रविश्यते गम्यतइतियावत् । तथाचसर्वैरपिज्ञायमानत्वहेतुतः विश्वंस्थूलं

भा०। वैश्वानरोजागरितस्थानगोगजवक्रकः। निर्मोताबाह्यसंवित्तेर्जीवानांतदगोचरः। अष्टादशमुखान्यस्यपुमाकाराणिसर्वशः। मध्यमंतुगजाकारंचतुर्बाहुःपरःपुमान्। पादौहस्तिकरोहस्ताइतिसप्तांगईरितः। स्थूलान्भोगानिंद्रियैस्सशुभान्भुंक्तेनचाशुभान्। विश्वंस्थूलंसमुद्दिष्टंसर्वगम्यत्वहेतुतः।

समुद्दिष्टं । भोक्तृत्वेनतत्संबंधीभगवान्वैश्वः तस्येदमित्यण् । रीङ्क्षयइतिधातोः । नरीयतेनक्षीयते अनाशात् अनाशनिमित्ततः नरः । वैश्वश्चासौनरश्चवैश्वानरइत्युदाहृतोविश्वाख्योभगवानित्यर्थः । अत्रवैश्वानरइतिभाष्येदीर्घस्त्वाधिक्यविवक्षया । संहितायांयत्रदैर्घ्यंपदेयत्रनदृश्यते । उक्तार्थस्यमहाधिक्यंश्रुतेस्तत्रविवक्षितमितिवचनादित्याहुः । वस्तुतस्तुनरेसंज्ञायामितिसूत्रेणविश्वशब्दस्यनरशब्देपरेसंज्ञायांदीर्घविधानात्वैश्वानरइतियुक्तमित्यवगंतव्यं । उपनिषदभिप्रेतानांविश्वादीनामुपासकान् दर्शयति ॥ **विनायकस्त्वित्यादिना** ॥ विनायकोगणपतिःविश्वस्यध्यानाद्गजवक्रतांऐत् । इण्गतौप्रापेत्यर्थः । तथैवतैजसध्यानाद्गजवक्रतामैदितिसंबंधः । तंयथायथोपासतइत्यादिश्रुतेरित्यर्थः । त्रिध्यानात्त्रयाणांविश्वतैजसप्राज्ञानांध्यानात् । चतुर्णांविश्वतैजसप्राज्ञतुरीयाणांध्यानात् । उपसंहरति ॥ **एवंभूतगुणइति** ॥ विनायकादीनांगजवक्रतादिप्रदगुणोपेतइत्यर्थः ॥ ३ ॥ तैजसस्यस्थानादिप्रतिपादनाय स्वप्नस्थानइत्यारभ्यद्वितीयःपादइत्यंतंवाक्यंप्रवृत्तं । तत्रप्रविविक्तभुक्त्वमंतःप्रज्ञत्वंच कीदृशमित्यतस्तदुभयंप्रमाणेनदर्शयति ॥ **जाग्रदिति** ॥ स्वप्नावस्थागतंयद्वस्तुतत् जाग्रत्कालीनपदार्थानुभवजन्यवासनोपादानकत्वात्प्रविविक्तं । जाग्रद्दृष्टपदार्थापेक्षयात्यंतविलक्षणं । तज्ज्ञानकारणत्वादंतःप्रज्ञः । तथाच प्रविविक्तंबाह्यपदार्थाद्विविक्तं

भा० । तत्संबंधीनरोऽनाशाद्वैश्वानरउदाहृतः । विनायकस्तुविश्वस्यध्यानादैद्गजवक्रताम् । तथैवतैजसध्यानात्त्रिध्यानादिंद्रइंद्रतां । चतुर्ध्यानाच्चरुद्रत्वंरुद्रआपजनार्दनात् । एवंभूतगुणोविष्णुश्चतुरात्मापरात्परइतिमहायोगे । जाग्रद्दर्शनसंस्काररूपत्वात्स्वप्नगंतुयत् । प्रविविक्तंतुतज्ज्ञानकारणोंतर्ज्ञउच्यतइतिवाराहे ।

स्वाप्नपदार्थजातं भुंक्ते स्वयंतदनुभवजन्यसारभोगवान्भवति जीवंभोजयतिचेतिप्रविविक्तभुक् । तादृशपदार्थमंतःदेहांतः मनसाकरणेनजीवंप्रज्ञापयति स्वयंचजानातीत्यंतःप्रज्ञइत्यर्थउक्तोभवतीतिज्ञातव्यं ॥ ४ ॥ प्राज्ञस्यस्थानादिप्रतिपादनायसुषुप्तस्थानइत्यादिकोपनिषत् । तत्रसुषुप्तस्थानंकीदृशमितिशंकायांलक्षणोक्त्यातन्निरूपयितुंयत्रसुप्तइत्यादिवाक्यंप्रवृत्तं । तत्रसुषुप्त्यवस्थांगतस्यकामराहित्येस्वप्नदर्शनाभावेचहेतुसूचकंसुप्तइतिपदंप्रमाणेनैवव्याचष्टे ॥ सुषुप्तंत्विति ॥ भावेक्तः । सुप्तिरेव सुषुप्तं । तमोऽज्ञानं अज्ञानकार्यमितियावत् । हरिंप्राज्ञनामकंप्राप्यस्थितःपुमान् । तदावृतःतेनतमसाऽऽवृतःयतोतोजीवःकिमपिनकामयेत् । नैवपश्येत् कमपिपदार्थंस्वप्नंचेतिशेषः । ननुस्वरूपादिज्ञानंतावदवश्यमंगीकर्तव्यं । एतावंतंकालंसुखमहमस्वाप्समित्युत्तरकालपरामर्शात् । अतोनपश्येदित्येतदयुक्तमित्यतआह ॥ स्वात्मेति ॥ स्वात्मसहितंतमः । स्वात्मतमःकालंचविनेतिसंबंधः । उपलक्षणमेतत् । वक्ष्यमाणरीत्यासुषुप्त्यवस्थांसुखंचविनेत्यपिद्रष्टव्यं ॥ तस्येति ॥ तमःकार्यसुषुप्त्याख्यस्थानस्येत्यर्थः । विश्वंस्थूलमित्यादिनाविश्वशब्दस्यनिरुक्तत्वात्तैजसप्राज्ञशब्दौनिर्वक्ति ॥ चित्तस्थइत्यादिना ॥ मनस्यंतस्तुतैजसइतिवचनात्तैजसःचित्तेस्थितःसन्स्वाप्नपदार्थंदर्शयेद्यतोऽतस्तैजसइत्यर्थः । अत्रचित्तस्थस्यतैजसत्वंनामतेजोवत्त्वमेव । ननु तैजसाहंकारकार्यत्वं । चित्तशब्दोक्तस्यमनसोवैकारिकाहंकारकार्यत्वादितिद्रष्टव्यं ॥ नबाह्यमिति ॥ तथाच प्रकर्षेणनज्ञाप

भा० । सुषुप्तंतुतमोज्ञेयंहरिंप्राप्यतदावृतः । नकामयेन्नैवपश्येज्जीवःस्वात्मतमोविना । कालंचतस्यस्थानस्यपतिःप्राज्ञोहरिःस्वयं । चित्तस्थो ॥ ६ ॥ दर्शयेत्तस्मात्तैजसःस्वप्नकृद्धरिः । नबाह्यंज्ञापयेद्यस्मात्प्राज्ञस्तेनजनार्दनः ।

यतीतिप्राज्ञइतिव्युत्पत्तिर्द्रष्टव्या । एकीभूतइत्येतदप्रतीतेर्व्याचष्टे ॥ एकीभावमिति ॥ सुषुप्त्यवस्थायांविश्वःतैजसश्चेत्युभौ तेनप्राज्ञेनएकीभावंव्रजेतांयतोतःप्राज्ञएकीभूतइत्युच्यतइतियोज्यं । प्रज्ञानघनोज्ञाननिबिडइत्यन्यथाप्रतीतिंनिवारयन्व्याचष्टे ॥ घनोजीवइति ॥ तमसाऽज्ञानेनवृतोजीवोघनइत्युच्यते । सकालस्येत्युपलक्षणं । ससुषुप्त्यवस्थस्यससुखस्येत्यपिद्रष्टव्यं । तथाचकालावस्थासुखसहितस्य तन्मात्रस्याज्ञानावृतजीवमात्रस्यप्रदर्शनात्प्रज्ञानघनइत्यर्थः । अनेनप्रज्ञानघनएवेत्येवकारस्य बुद्ध्याविविक्तेनघनपदेनसंबंधः । तथाचकालावस्थासुखसहितमज्ञानयुक्तंघनंजीवमेवप्रज्ञापयतीतिप्रज्ञानघनएवेत्यर्थोद्रष्टव्यः । आनंदमयइत्यत्रमयटोविकारार्थत्वप्रतीतिंवारयन्व्याचष्टे ॥ आनंदमयइति ॥ तथाचमयट्प्राचुर्यार्थे । प्राचुर्यंचपूर्णत्वमित्यु क्तंभवति । चेतोमुखइत्यत्रचित्तंतुचेतोहृदयमित्यभिधानाच्चेतःशब्दोंतःकरणपरइतिप्रतीतिनिरासायव्याचष्टे ॥ चेतोमुखइति ॥ ननुघनंप्रज्ञापयतीतिघनप्रज्ञानइतिभाव्यं प्रज्ञानघनइतिकथमित्यतआह ॥ प्रज्ञानघनइति ॥ अग्न्याहितादित्वाद्धनशब्दस्यपर निपातइतिभावः । तत्रज्ञापकमाह ॥ घनप्रज्ञइतीति ॥ ननुविश्वतैजसयोरप्यानंदभुक्त्वादानंदभुगितिप्राज्ञस्यैवकोविशेषःकथ्यत इत्यतआह ॥ विषयभोगंविनेति ॥ विश्वतैजसयोस्तुबाह्यांतर्विषयभोगेनानंदोक्तेरितिभावः ॥ आनंदमात्रेति ॥ विषयभो

भा० । एकीभावंव्रजेतांचतेनविश्वश्चतैजसः । एकीभूतस्तदाप्राज्ञोघनोजीवस्तमोवृतः । तन्मात्रस्यसकालस्यघनप्रज्ञःप्रदर्शनादितिप्रका शिकायां । आनंदमयःपूर्णानंदः । चेतोमुखोज्ञानस्वरूपमुखः । प्रज्ञानघनइतिविपरीतसमासः । घनप्रज्ञइतिवक्ष्यमाणत्वात् । विषयभोगंविना ऽऽनंदभुक्त्वादानंदभुगितिविशेषः ।

गानभिव्यक्तकेवलस्वरूपानंदेत्यर्थः । सुषुप्तस्थानएकीभूतइत्यादिवाक्योक्तमानंदमयत्वचेतोमुखत्वरूपंविशेषणद्वयंइतरविशेषणवन्नप्राज्ञमात्रनिष्ठमितिवदन्नेषसर्वेश्वरइत्यादिनोक्तान्यपिविशेषणानिनसन्निहितप्राज्ञमात्रनिष्ठानि किंतुविश्वादिचतुष्टयसाधारणानीत्याह ॥ **आनंदमयेति** ॥ आनंदमयचेतोमुखेत्यत्रभावप्रधानोनिर्देशः । नन्वेषसर्वेश्वरइत्यादिवाक्योक्तविशेषणानांसर्वसाधारण्यसंभवेपिप्राज्ञमात्रनिष्ठत्वेनोक्तयोरानंदमयत्वचेतोमुखत्वयोःकथंसर्वसाधारण्यमित्यतआह ॥ **अन्यत्रेति** ॥ विश्वादित्रयेत्यर्थः । एकत्र प्राज्ञे ॥ ५ ॥ नन्वेषसर्वेश्वरइत्यादिवाक्योक्तानामपिविशेषणानांकथंविश्वादिरूपसाधारण्यं । एषइतिपदेनप्राज्ञस्तृतीयइत्यव्यवहितप्राज्ञस्यैवपरामर्शादित्यतआह ॥ **एषइति** ॥ तथाचैषइत्यस्यपूर्वप्रकृतरूपचतुष्टयपरामर्शकत्वेनप्राज्ञमात्रपरामर्शकत्वानंगीकारादितिभावः । आनंदमयत्वादिविशेषणानांरूपचतुष्टयेपिसाम्येप्रमाणमाह ॥ **परमात्मेति** ॥ तुरीयस्यापिनासिकामूलमारभ्यद्वादशांगुलांतेमस्तकमध्येव्यवस्थितत्वोक्त्यासर्वप्राणिशरीरगतत्वंमंतव्यं । चेतोमुखत्वेहेतुः पूर्णेति । स्वरूपतः स्वरूपत्वतः । अत्रचेतोमुखइतिमुखस्यैवज्ञानस्वरूपत्वंप्रतीयतेऽतस्तांनिवारयति ॥ **मुखशब्दस्त्विति** ॥ लक्षणाबीजसंबंधस्तुएकदेशैकदेशिभावादिर्द्रष्टव्यः । तथाचदशामात्रंदत्तमित्यादाविवैकदेशेनैकदेशिनःसर्वस्यापिदेहस्यलक्षणा

भा० । आनंदमयचेतोमुखसर्वज्ञत्वसर्वेश्वरत्वादिचतुष्टयेपिसमं । अन्यत्रातिदेशार्थमेकत्रानंदमयत्वंचेतोमुखत्वंचोक्तं । एषचतूरूपआत्मासर्वज्ञत्वसर्वेश्वरत्वादिलक्षणः । परमात्माचतूरूपःसर्वप्राणिशरीरगः । विश्वश्चतैजसःप्राज्ञस्तुरीयश्चेतिकथ्यते। तानिरूपाणिसर्वाणिपूर्णानंदमयानितु। चेतोमुखानिसर्वाणिपूर्णज्ञानस्वरूपतः। मुखशब्दस्तुसर्वस्यदेहस्याप्युपलक्षकः ।

कार्येतिभावः । यद्वाचेतोमुखइत्यत्रमुखोमुख्यः । उत्तमइतियावत् । उत्तमत्वंचात्रपूर्णत्वमभिप्रेतं । तथाचचेतसाज्ञानेनमुखः उत्तमःपूर्णइत्यर्थांतरमभिप्रेत्याह ॥ **तथापीत्यादिना** ॥ अयमर्थः । अपियद्यपि । अयंमुखशब्दःस्वतःमुखवाचीसन्भवति । तथापिविभोर्ज्ञानस्यपूर्णत्वंसूचयेत् । कुतःमुखशब्दस्यमुख्यवाचित्वात् । मणिर्मुखंप्रधानंचेत्युत्तमस्यवचोभवेदितिवचनात् । उत्तमत्वंचपूर्णत्वमेवाभिप्रेतं । अतएवपूर्णत्वंवदेदित्यनुक्त्वासूचयेदित्युक्तमिति । ननुस्थूलभुक्प्रविविक्तभुगितिविश्वतैजसयोर्विषयभोगउक्तः । सतुनयुक्तः। तथात्वेभगवदानंदस्यविषयभोगाधीनत्वप्राप्त्यापूर्णानंदत्वभंगापत्तेः। यदिपूर्णानंदत्वांगीकारस्तर्हिविषयभोगायोगइत्याशंकांब्रह्मतर्कवाक्येनपरिहरति ॥ **पूर्णानंदेति** ॥ पूर्णानंदस्वरूपस्यापिहरेःस्थूलादिविषयभोगःक्रीडैव नचान्यथा । अविद्यमानातिशयितानंदजनकोनैवेत्यर्थः । अत्रदृष्टांतमाह ॥ **यथेति** ॥ एवंविषयभोगेनभगवदानंदस्यविशेषोनास्तीतिभावः ॥ ६ ॥ नन्वेतदुपनिषद्द्रष्ट्रासलिलेश्वरेणस्वोक्तार्थे अत्रैतेश्लोकाभवंतीति ब्रह्मदृष्टमंत्राःप्रमाणत्वेनोदाह्रियंते तदयुक्तं । सलिलेश्वरोक्तंतावत्प्रमाणमप्रमाणंवा । आद्येमंत्रोदाहरणंव्यर्थं । द्वितीये अप्रमाणभूतेर्थेप्रमाणभूतमंत्रोदाहरणायोगादित्याशंकांपुराणवाक्येनपरिहरति ॥ **प्रमाणस्येति** ॥ प्रमाणस्यापिसंवादभूतंप्रमाणंविद्यतेचेत्तर्हितत्प्रमाणंबलवदेवभवति । अत्रार्थेएतदुपनिषदुक्तंप्रमेयंदृष्टांतइत्याह ॥ **ब्रह्मदृष्टानिति** ॥ प्रमाणशेषोक्तंपृथक्पृथगित्येतदप्रतीतेः स्वयंव्याख्याति ॥

भा० । तथापिमुखशब्दोयंपूर्णत्वंसूचयेद्विभोः । ज्ञानस्यमुख्यवाचित्वान्मुखवाच्यपिसन्स्वतइतिमार्कंडेये । पूर्णानंदस्वरूपस्यक्रीडाभोगोनचान्यथा । यथादित्यस्यदीपेनविशेषोस्तिनकश्चनेतिब्रह्मतर्के । प्रमाणस्यप्रमाणंचेद्बलवद्विद्यतेमुने । ब्रह्मदृष्टानतोमंत्रान्प्रमाणंसलिलेश्वरः ।

खंडचतुष्टयेपीति ॥ एषयोनिःसर्वस्येत्यत्रप्रमाणत्वेनप्रवृत्तंप्रभवइति । ननुउत्तरार्धेप्राणइत्युक्तत्वात्कथंविष्णुरेवेत्युक्तमित्यतआह ॥ सर्वस्यहीति ॥ १२ ॥ सर्वंजनयतीत्युक्तंविष्णोर्जगदुत्पत्तिनिमित्तकारणत्वमेवस्पष्टयन्वादिनांपूर्वपक्षाननुवदितुंविभूतिंप्रसवमित्यादिकोग्रंथःप्रवृत्तः । तत्रविभूतिंप्रसवमित्येतद्व्याचष्टे ॥ विष्णुरिति ॥ तत्तद्विविधभूतिःतत्तत्पदार्थाकारेणविविधभवनं । अपंडितैःभास्करैः । स्वप्नमायासरूपेत्येतद्व्याचष्टे ॥ स्वप्नेति ॥ स्वप्नसरूपां स्वप्नसृष्टिसरूपां । मायासरूपां ऐंद्रजालविद्यांअज्ञाजनाःमायिनः । अनादिकालतोवृत्ताःसमयाहिप्रवाहतइत्युक्तत्वान्नात्रकश्चित्क्षुद्रोपद्रवः ॥ १३ ॥ एवंपूर्वपक्षद्वयमभिधायसिद्धांतज्ञानकातरंप्रतिसिद्धांतंनिरूपयितुंप्रवृत्तमिच्छामात्रमित्यर्धर्चंव्याचष्टे ॥ अविकारस्येति ॥ हरेरितिशेषः । पूर्वपक्षस्वरूपव्याक्रियैवनिराक्रियेत्याशयेनपूर्वपक्षानुवादमात्रस्यैवकृतत्वात्तदभिप्रेतंदूषणंदर्शयति ॥ पूर्णशक्तेरिति ॥ अक्षमाःसत्यसृष्टौहिमायासृष्टिंवितन्वते । अनंताचिंत्यविभवःकथंतामीहतेहरिरितिवचनादित्यर्थः ॥ सार्वज्ञादिति ॥ स्वप्नस्याज्ञानकार्यत्वाद्भगवतश्चसार्वज्ञान्नस्वप्नवत्सृष्टिः । इदंचदूषणंस्वप्नमायासरूपेत्यनूदितमायिपक्षस्येतिद्रष्टव्यं । विभूतिंप्रसवमित्युक्तभास्कर

भा० । अत्रश्लोकाभवंतीतिचकारैवपृथक्पृथगितिगारुडे । खंडचतुष्टयेपिपृथक्पृथक् । प्रभवःसर्वभावानांविष्णुरेवनसंशयः । इत्थंसतांनिश्चयःस्यादन्यथात्वसतांभवेत् ॥ ७–११ ॥ सर्वस्यहिप्रणेतृत्वात्प्राणोनारायणःपरः । तांसृष्टिंबहुधाप्राहुर्ज्ञानिनोऽज्ञानिनस्तथा । विष्णुर्विकृतिमायातिवियदादिस्वरूपिणीं । तत्तद्विविधभूतिस्तुसृष्टिःप्रोक्ताह्यपंडितैः । स्वप्नमायासरूपांचकेचिदज्ञाजनाविदुः । अविकारस्यचिन्मात्रस्वेच्छयैवाखिलंजगत् । उत्पद्यतइतिप्राज्ञाःप्राहुर्ब्रह्मादयोखिलाः । पूर्णशक्तेःकुतोमायासार्वज्ञात्स्वप्नवत्कुतः ।

पक्षंदूषयति ॥ सर्वदोषेति ॥ भगवतएवमहदाद्याकारेणपरिणामांगीकारेश्शुनकगर्दभादिपदार्थाकारेणापिविकारप्राप्त्यादूषणा पत्तेरितिभावः । एवंपूर्वपक्षद्वयेदूषणमभिधायप्रतिपादितस्यस्वपक्षस्यप्रामाणिकत्वंवदन्नुपसंहरति ॥ तस्मादिति ॥ वेदवचः कविर्मनीषीपरिभूःस्वयंभूर्याथातथ्यतोर्थान्व्यदधाच्छाश्वतीभ्यःसमाभ्यइत्यादिवेदवचः । एवंसिद्धांतज्ञानकातरंप्रति सिद्धांतंनिरूप्य पुनःपूर्वपक्षंप्रतिपादयितुंप्रवृत्तं कालात्प्रसूतिमितिवाक्यंव्याकुर्वन् तदभिप्रेतपूर्वपक्षांतराण्यपिदर्शयति ॥ केचिदित्यादिना ॥ मिथ्याज्ञानमूलत्वादेतानिमतान्यग्राह्याणीत्याशयेनाह ॥ विमूढाइति ॥ यतएतेसर्वेपिवादिनोविमूढाःमोहवंतोऽतस्तन्मतानिमिथ्याज्ञानमूलकानीत्याशयः । कुतस्तेविमूढाइत्यतआह ॥ यतइति ॥ प्रधानादीनामस्वातंत्र्यान्नजगत्कारणत्वमित्याशयेनाह ॥ प्रधानेति ॥ प्रधानादेः द्रव्यंकर्मचकालश्चेत्यादिनानारायणवशत्वंप्रमितमितिभावः ॥ १४ ॥ ननुभगवतइच्छापूर्वकंस्रष्टृत्वमुक्तं । तदयुक्तं । प्रयोजनापेक्षयास्रष्टृत्वेऽपूर्णत्वापत्तेस्तदनपेक्षयास्रष्टृत्वेमंदत्वापत्तेरित्याशंकायां सिद्धांतंविवक्षुरत्रापिपूर्वपक्षंवक्तुंभोगार्थंसृष्टिरित्यादिवाक्यंप्रवृत्तं । तद्व्याचष्टे ॥ तस्यापीति ॥ अविद्यमाननैपुणाः केचिद्वादिनो विष्णोःसृष्टिंविष्णुकर्तृकांसृष्टिमतृप्तस्यैवविष्णोर्भोगार्थमाहुरित्यन्वयः । केचि द्रामानुजाः । प्रलयेएकस्यैवविष्णोःसत्वेनत

भा० । सर्वदोषव्यतीतस्यविकारःकुतइष्यते । तस्मादेवाविकारस्यविष्णोरिच्छावशादिदं । यथार्थमेवसंभूतमितिवेदवचोऽखिलं । केचित्कालत एवैतांसृष्टिमाहुरकोविदाः । केचिद्रुद्राद्ब्रह्मणश्चप्रधानादितिचापरे । विमूढाःसर्वएवैतेयतोनारायणःपरः । सर्वकर्तासर्वशक्तिरेकएवनचापरः ॥ प्रधानकालब्रह्मेशमुखाःसर्वेपितद्वशाः । तस्यापिविष्णोःसृष्टिंतुकेचिदाहुरनैपुणाः ।

स्याप्यालस्यप्राप्त्यातत्परिहारायक्रीडार्थंसृष्टिमाहुः । क्रीडायाः आलस्यपरिहारार्थतायाः लोकेदर्शनादितियोज्यं । एवंपूर्वपक्षा वभिधाय लोकवत्तुलीलाकैवल्यमितिसिद्धांतंवक्तुंदेवस्यैषःस्वभावोयमितिवाक्यंप्रवृत्तं । तद्व्याचष्टे ॥ तुविपश्चितइति ॥ वि पश्चितस्त्विवतिसंबंधः । आहुरितिवर्तते । एषोयमित्यस्यार्थः साचक्रीडेति । जगत्सर्जनादिरूपाक्रीडाव्यापारइत्यर्थः । भोगार्थ क्रीडार्थसृष्टिरितिमतद्वयनिराकरणायप्रवृत्तस्याप्तकामस्यकास्पृहेत्यस्यार्थः कुतइति । विभोरतृप्त्याजातभोगार्थस्पृहा । आलस्य परिहारार्थंजातक्रीडार्थवाकुतः । नकुतोपीत्यर्थः ॥ १५ ॥ खं० १ ॥ ततश्चायंखंडार्थः ॥ ॥ मंडूकरूपिणावरुणेनविश्वा दिचतूरूपीनारायणःस्तूयते ॥ ॐमित्यादिकयासमग्रोपनिषदा ॥ ॐमितिप्रणवप्रतिपाद्यंयत्तदेतदक्षरंनाशरहितंब्रह्मैव । तदिदंप्रणवप्रतिपाद्यंब्रह्म गुणपूर्णत्वात्सर्वमित्युच्यते । अत्रोंकारवाच्यतयोक्तमक्षरंनप्रसिद्धाकाराद्यक्षरं । किंतुयत्पूर्णपरब्रह्म रूपाक्षरंतदेवोंकारवाच्यमितिप्रणवस्याभिधेयमुक्त्वातस्यभगवतिप्रवृत्तौनिमित्तमसाधारणलक्षणंकथ्यते ॥ तस्येत्यादिना ॥ तस्यभगवतःउपसमीपेवाचकत्वेनस्थितस्योंकारस्यविशेषेणाख्यानंव्याख्यानंप्रवृत्तिनिमित्तंकथ्यतइत्यर्थः । तस्योपपन्नंव्याख्यानं क्रियतइतिवा । अक्षरंभूतंभवद्भविष्यदितिव्याख्यानमित्यन्वयः । अत्रकालत्रयसंबंधित्वंनार्थः । तस्यजीवादिसाधारण्यात् । यच्चान्यत्त्रिकालातीतमित्यनुवादासंभवाच्च । अतःकालत्रयेप्येकरूपत्वमेवाभिप्रेतं ॥ १ ॥ सर्वमित्यत्रोक्तंपूर्णत्वमन्यत्रातिव्या

भा० । अतृप्तस्यैवभोगार्थक्रीडार्थंतुविपश्चितः । साचक्रीडास्वभावोस्यकुतोतृप्त्यास्पृहाविभोरितिहरिवंशेषु ॥ खंड ॥ १ ॥

उप० । ओमित्येतदक्षरमिदंसर्वं । तस्योपव्याख्यानंभूतंभवद्भविष्यदिति ॥ १ ॥

प्तंकिंनस्यादिदंसर्वमिति पूर्वंनिरवधारणमुक्तत्वात् इत्याशंकायांनेत्याह ॥ सर्वमोंकारएवेति ॥ ॐकारवाच्यंब्रह्मैवसर्वंपूर्ण मित्युक्त्याऽन्यस्यपूर्णत्वंनिवार्यतेऽतोनातिप्रसंगइतिभावः । एवंभूतंभवत्यादिनोक्तंत्रिकालातीतत्वंअन्यस्यापिकिंनस्यात् । पूर्वं निरवधारणमुक्तत्वादित्यतोनेत्याह ॥ यच्चान्यत्त्रिकालातीतंतदप्योंकारएवेति ॥ ॐकारवाच्यभगवतएवत्रिकालातीतत्व मित्युक्त्याऽन्यस्यत्रिकालातीतत्वंनिवार्यतेऽतोनातिप्रसंगइतिभावः । ननुचेतनप्रकृत्यादेरपित्रिकालातीतत्वात्पुनरतिव्याप्तिरि त्यतउक्तं ॥ अन्यदिति ॥ तथाचप्रकृत्यन्यत्वेसतिकालत्रयकृतविकारशून्यत्वमेवेहप्रवृत्तिनिमित्तभूतंलक्षणतयाभिप्रेतंअतो व्याकृताकाशकालवर्णानांप्रकृत्यभिमन्यमानानांव्यावर्तितत्वान्नकुत्राप्यतिप्रसंगइतिभावः । देहाभिमानकृतोच्चनीचत्वादिरूप विकारसद्भावान्नजीवेष्वतिव्याप्तिः । मुक्तानामपिपूर्वसंसारावस्थायांकालत्रयकृतविकारसद्भावेनकालत्रयकृतविकारशून्यत्वाभा वान्नतेष्वतिव्याप्तिरित्यपिद्रष्टव्यं । ननुभगवतएवपूर्णत्वमुक्तंकिंतत्रप्रमाणमित्यतस्तत्सूचयन्नाह ॥ सर्वंह्येतदिति ॥ एतद्ब्रह्मों कारप्रतिपाद्यमक्षराख्यंपरंब्रह्म सर्वं गुणपूर्णमित्येतत् हि पूर्णमदइत्यादिश्रुतिप्रसिद्धमित्यर्थः । ननुश्रियोब्रह्मादिजीवानांचा स्वातंत्र्यदर्शनात्तत्रस्थित्वातेषामादानादिकर्ताकश्चनवक्तव्यः । तथाच तस्यापिपूर्णत्वत्रिकालातीतत्वयोरवश्यंस्वीकर्तव्यत्वाद वधारणमयुक्तमित्यतः सोपिभगवानेवेत्याह ॥ अयमात्माब्रह्मेति ॥ श्र्यादिषुस्थित्वायोयमात्मा यच्चाप्नोतियदादत्तइतिवच नादादानादिकर्ताप्रतीयतेऽनुमानेनसह्योंकारवाच्योविष्णुरेवेत्यर्थः ॥ २ ॥ एवंसमस्तप्रणवप्रतिपाद्यभगवदुपास्तिमभिधायेदानीं

उप० । सर्वमोंकारएव यच्चान्यत्त्रिकालातीतंतदप्योंकारएव । सर्वंह्येतद्ब्रह्म । अयमात्माब्रह्म ॥ २ ॥

प्रणवांशाकारोकारमकारनादप्रतिपाद्यानांविश्वतैजसप्राज्ञतुरीयाणामुपास्तिंअकारःप्रथममात्रेत्यत्रवक्तुमादौप्रस्तावयति ॥ सो यमात्मेति ॥ यःश्रीब्रह्मादीनामादानादिकर्तृत्वेनोक्तःसोयमात्मोंकारवाच्योदेहस्थोभगवान् चतुष्पात् चत्वारःपादाअंशाःय स्यासौचतुष्पादित्यर्थः । ननुकेतेचत्वारःपादाः कानिचतेषांस्थानानि कश्चतेषांव्यापारः किंविधंचरूपं किंचतेषांभोग्यमित्यतो नांतःप्रज्ञमित्यादिनातुरीयस्यवक्तुंविश्वतैजसप्राज्ञानांस्थानादीनितावदाह ॥ जागरितस्थानइत्यादिना तृतीयःपादइत्यं तेन ॥ तत्रविश्वस्यस्थानादिकंदर्शयति ॥ जागरितस्थानइत्यादिना ॥ जागरितंस्थानंदक्षिणाक्ष्यादिरूपंयस्यासौतथोक्तः। बहिःप्रज्ञः बहिष्ठंवस्तुप्रज्ञापयति बाह्यपदार्थविषयकसंवित्तिनिर्मातेतियावत् । सप्तांगः द्यौपादौ चत्वारोहस्ता हस्तिकरइतिस प्तांगवान् । एकोनविंशतिमुखः तत्राष्टादशमुखानिपुमाकाराणि मध्यमंतुगजाकारमितिशेषः । स्थूलभुक् स्थूलान्बाह्यान्शुभा न्विषयान्जीवेंद्रियद्वाराभुंक्तेइत्यर्थः । वैश्वानरः विश्यतेज्ञानेनप्रविश्यतइतिव्युत्पत्त्याज्ञानविषयीभूतस्थूलंविश्वशब्दोक्तं भोक्तृ त्वेनतत्संबंधीवैश्वः अनाशान्नरः वैश्वश्चासौनरश्चेतिवैश्वानरः विश्वइतियावत् ॥ ३ ॥ प्रथमःपादःप्रथमांशः । एवंविश्वस्य स्थानादिकंप्रतिपाद्यतैजसस्यप्रतिपादयति ॥ स्वप्नस्थानइत्यादिना ॥ स्वप्नंमनोरूपंस्थानंयस्यासौतथोक्तः । अंतःप्रज्ञःअंत स्थितसंस्कारमयपदार्थान्प्रकर्षेणज्ञापयतीत्यर्थः । सप्तांगएकोनविंशतिमुखइतिपूर्ववद्व्याख्येयं । प्रविविक्तभुक् जाग्रत्पदार्थानु

उप० । सोयमात्माचतुष्पात् । जागरितस्थानोबहिःप्रज्ञःसप्तांगएकोनविंशतिमुखःस्थूलभुग्वैश्वानरःप्रथमःपादः ॥ ३ ॥ स्वप्नस्थानोंतःप्रज्ञः सप्तांगएकोनविंशतिमुखःप्रविविक्तभुक्तैजसोद्वितीयःपादः ॥ ४ ॥

भवजन्यवासनोपादानकत्वेनतद्रूपत्वात्स्वप्नस्थितंवस्तुजाग्रत्पदार्थविलक्षणत्वात्प्रविविक्तमुच्यते । तद्धुंक्ते तदनुभवजन्यभोगवानित्यर्थः । तैजसोद्वितीयःपादोद्वितीयोंशः ॥ ४ ॥ एवंतैजसस्यस्थानान्युक्त्वाप्राज्ञस्यापिदर्शयितुमुत्तरोग्रंथः । तत्रप्राज्ञस्यसुषुप्तस्थानइतिसुषुप्तंस्थानंकथ्यते । तत्सुषुप्तंस्थानंकीदृशमित्याशंकायांलक्षणोक्त्याऽदौतन्निरूपयति ॥ यत्रेति ॥ यत्रयस्यामेवावस्थायांसुप्तःअज्ञानावृतः मनआदींद्रियाणांउपरतत्वाज्जीवस्वरूपकालाज्ञानसुषुप्त्यवस्थासुखव्यतिरिक्तंकंचनपदार्थंनपश्यति कंचनकामंकाम्यंचनकामयते नचस्वप्नंपश्यति तत्सुषुप्तं भावेक्तः । सुषुप्तिरितियावत् । सुषुप्तंहृदयाकाशरूपंस्थानंयस्यासौतथोक्तः । एकीभूतःप्रत्यहं विश्वतैजसाभ्यामेकीभावस्यापद्यमानत्वेनैकीभूतइत्युच्यते । प्रज्ञानघनएव अत्राद्घ्याहितादिवद्धनप्रज्ञानइतिविपरीतसमासः । एवकारस्यबुद्ध्याविवेकेनघनशब्देनान्वयः । तथाचघनंअज्ञानयुक्तंउपलक्षणमेतत् । कालसुषुप्त्यवस्थासुखयुक्तंजीवस्वरूपमेव प्रज्ञापयतीतिप्रज्ञानघनः । आनंदमयः पूर्णानंदस्वरूपः । आनंदभुक् विषयभोगंविनाप्यभिव्यक्तकेवलस्वरूपभूतानंदभुक्त्वादानंदभुक् । तेनविश्वतैजसयोर्व्यावृत्तिः । तयोःस्थूलांतरविषयभोगेनानंदोक्तेः । हीत्येतदुभयंविशेषानंतशक्तिभ्यांउपपन्नमितिप्रसिद्धिंसूचयति । चेतोमुखः अत्रमुखशब्दःसर्वदेहोपलक्षकः । ज्ञानरूपंमुखंशरीरंयस्यासौतथोक्तः । यद्वामुखोमुख्यः । उत्तमइतियावत् । मणिर्मुखंप्रधानंचेत्युत्तमस्यवचोभवेदितिवचनादुत्तमत्वंचेहपूर्णत्वमभिप्रेतं । त

उप० । यत्रसुप्तोनकंचनकामंकामयतेनकंचनस्वप्नंपश्यतितत्सुषुप्तं । सुषुप्तस्थानएकीभूतः प्रज्ञानघनएवानंदमयोह्यानंदभुक्चेतोमुखःप्राज्ञस्तृतीयःपादः ॥ ५ ॥

थाचचेतसाज्ञानेनमुखःपूर्णइत्यर्थः । एतादृशःप्राज्ञःतृतीयःपादःतृतीयोंशः । आनंदमयत्वंचेतोमुखत्वंचयत्प्राज्ञस्यकथितंतदि
तररूपत्रयेपिबोद्धव्यं ॥ ५ ॥ एवंविश्वादीनांत्रयाणांमहिमानंनिरूप्य नांतःप्रज्ञमित्यादिनातुरीयमहिमानंपृथग्वक्तुंचतुर्णामपि
महिमानंयुगपदादावाह ॥ **एषइत्यादिना** ॥ एषचतूरूपोभगवान्सर्वेषामीश्वरः । एषसर्वज्ञःसर्वांतर्यामी । एषःसर्वस्ययोनि
कारणं ।·एतदेवविशदयति भूतानांप्रभवाप्ययौहियस्मात् । चतूरूपोपेताद्धरेःसकाशाद्भवतइति ॥ ६ ॥ सलिलेश्वरःस्वोक्तदार्ढ्या
यब्रह्मदृष्टान्मंत्रान्प्रमाणत्वेनवक्तुंप्रतिजानीते ॥ **अत्रैतइति** ॥ अत्र मदुक्तेजागरितस्थानइत्याद्यर्थे । एते वक्ष्यमाणाब्रह्मदृष्टा
मंत्राः । प्रमाणतयाभवंतीत्यर्थः । विश्वोबहिःप्रज्ञःतैजसोंतःप्रज्ञः प्राज्ञःप्रज्ञानघनइत्यत्रमंत्रंपठति ॥ **बहिरिति** ॥ बहिःप्रज्ञइत्या
द्युक्तरीत्यास्पष्टार्थे।एकएवभगवान्विश्वादिरूपेणत्रिधा बहिःप्रज्ञत्वादिप्रकारत्रयोपेतत्वेनचस्मृतइत्यर्थः ॥७॥ जागरितस्थानःस्वप्न
स्थानःसुषुप्तस्थानइत्युक्तार्थेमंत्रंपठति॥**दक्षिणेति**॥हृदिहृदयस्थेआकाशेत्रिधा स्थानत्रयवत्त्वेन।देहेव्यवस्थितइत्यर्थः ॥ ८ ॥ स्थूल
भुक्प्रविविक्तभुगानंदभुगित्युक्तार्थेमंत्रंपठति॥**विश्वइति**॥स्थूलभुगित्याद्युक्तार्थे। त्रिधा प्रकारत्रयेण। भोगं विश्वादीनां॥९॥तत्रैवमं

उप० । एषसर्वेश्वरएषसर्वज्ञएषोंतर्यामी । एषयोनिःसर्वस्यप्रभवाप्ययौहिभूतानां ॥ ६ ॥ अत्रैतेश्लोकाभवंति । बहिःप्रज्ञोविभुर्विश्वोह्यंतः
प्रज्ञस्तुतैजसः । घनप्रज्ञस्तथाप्राज्ञएकएवत्रिधास्मृतः ॥ ७ ॥ दक्षिणाक्षिमुखेविश्वोमनस्यंतस्तुतैजसः । आकाशेचहृदिप्राज्ञस्त्रिधादेहेव्यवस्थितः ॥८॥
विश्वोहिस्थूलभुङ्नित्यंतैजसःप्रविविक्तभुक् । आनंदभुक्तथाप्राज्ञस्त्रिधाभोगंनिबोधत ॥ ९ ॥

न्त्रांतरंपठति॥**स्थूलमिति**॥ स्थूलंविश्वंतर्पयते । तैजसंप्राज्ञमित्युभयत्रतर्पयतइत्यनुवर्तते । आनंदं आनंदः। तृप्तिंविश्वादीनां ॥१०॥
जागरितादिस्थानेषुविश्वादिरूपोभोक्तास्थूलादिरूपंतद्भोज्यंचेत्युभयंसर्वथाज्ञेयमित्याशयवान् तद्वेत्तुःफलमाह ॥ **त्रिष्विति** ॥
तेजःस्वरूपंचगृहंप्राज्ञैर्धामेतिगीयतेइत्यभिधानादत्रधामशब्दोगृहापरपर्यायस्थानवाची । तथाचत्रिषुदक्षिणाक्षिमुखइत्यादिनो
क्तेषुजागरितादिषुधामसुस्थानेषुयोभोक्ता विश्वोहिस्थूलभुगित्यादिनाप्रकीर्तितोविश्वादिः तस्ययत्स्थूलादिकंभोज्यं स्थूलंतर्पय
तइत्यादिनाकीर्तितं एतदुभयंचयोवेदसभुंजानोऽभ्यवहारादिकंकुर्वाणोपिनलिप्यते । अहंभोक्ताममेदंभोज्यमित्यभिमानरहितो
भवति । विश्वादिरूपस्यहरेरेवभोक्तृत्वज्ञानादित्यर्थः ॥ ११ ॥ एषयोनिःसर्वस्येत्यत्रमंत्रंपठति ॥ **प्रभवइति** ॥ चतूरूपोहरि
रेवसर्वभावानां चेतनाचेतनपदार्थानां प्रभवः उत्पादक इतिनिश्चयरूपंज्ञानंसतामेव । असतांत्वन्यथेतिभावः । एतदेवविवृणो
ति ॥ **सर्वमिति** ॥ सर्वस्यप्रणेतृत्वात्प्राणः । पुरिशेतेऽसौपुरुषोविश्वादिचतूरूपोहरिः सर्वमचेतनंस्वरूपेणजनयति । चेतोंशू
न्ज्ञानरश्मियुक्तान् चेतनान् जीवान् पृथग्जडवैलक्षण्येन । देहद्वाराजनयतीत्यर्थः ॥ १२ ॥ भगवान्नमृदादिवदुपादानकार
णं किंनाम निमित्तमेवेतिजनयतीत्यनेनसूचितं । तदेवेच्छामात्रंप्रभोस्सृष्टिरित्यनेनस्पष्टयिष्यन् आदौवादिनांपक्षान्तेषांस्वरूप
व्याक्रियैवनिराक्रियेतिमन्यमानोनुवदति ॥ **विभूतिमित्यादिना** ॥ केचित्सृष्टिचिंतकाः सृष्टिस्वरूपनिरूपणेदक्षत्वाभिमा

उप० । स्थूलंतर्पयतेविश्वंप्रविविक्तंतुतैजसं । आनंदंचतथाप्राज्ञंत्रिधातृप्तिंविजानथ ॥ १० ॥ त्रिषुधामसुयद्भोज्यंभोक्तायश्चप्रकीर्तितः । वेदैतदु
भयंयस्तुसभुंजानोनलिप्यते ॥ ११ ॥ प्रभवःसर्वभावानांसतामितिविनिश्चयः । सर्वंजनयतिप्राणश्चेतोंशून्पुरुषःपृथक् ॥ १२ ॥ विभूतिंप्रसवं
त्वन्येमन्यंतेसृष्टिचिंतकाः । स्वप्नमायासरूपेतिसृष्टिरन्यैर्विकल्पिता ॥ १३ ॥

नवंतोभास्कराः । विष्णोर्याविभूतिः महदादिरूपेणविविधभवनरूपा तामेवप्रसवंजगदुत्पत्तिमाहुः । अयंपक्षः अविकारतयाश्रु त्यादिप्रसिद्धस्येश्वरस्यैवैताद्दशविविधभवनांगीकारेहीनत्वादिदोषप्राप्त्याऽयुक्तइतिहृदयं । अन्यैःप्रच्छन्नबौद्धैर्मायिभि रेषासृष्टिः स्वप्नमायासरूपा स्वाप्नपदार्थसृष्टिसद्दशी ऐंद्रजालिकमायासद्दशीवा नयथार्थेतिविकल्पिता निश्चितेत्यर्थः । अयमपिपक्षः पूर्ण शक्तेः कुतोमायासार्वज्ञात्स्वप्नवत्कुतः याथातथ्यतोर्थान्व्यदधात् अशक्ताःसत्यसृष्टौहिमायासृष्टिंवितन्वते । अनंताचिंत्यविभवः कथंतामीहतेहरिः वैधर्म्याच्चनस्वप्नादिवदित्यादिश्रुतिस्मृतिसूत्रविरुद्धत्वादुपेक्ष्यः ॥ १३ ॥ सिद्धांतंनिरूपयति ॥ इच्छेति ॥ प्रभोःअविकारिणोमायातीतस्यहरेःसकाशाद्यासृष्टिःअखिलस्यापिजगतः साइच्छामात्रं इच्छामात्राधीनेतिसृष्टिविषयेयथार्थनि श्चयवंतोब्रह्मादयःप्राहुः । अनेनब्रह्मणोजगज्जन्मादिकर्तृत्वमेवसिद्धांतइत्युक्तंभवति एवंसिद्धांतज्ञानकातरंप्रतिपूर्वपक्षमध्येसि द्धांतमभिधायपुनःपूर्वपक्षान्निरूपयति ॥ कालादित्यादिना ॥ कालस्यैवसर्वोत्तमत्वध्यातारोभूतानांकालादेवोत्पत्तिंमन्यंते । उपलक्षणमेतत् । रुद्रचिंतकाः ब्रह्मचिंतकाः प्रधानचिंतकाः भूतानांप्रसूतिंरुद्रादेरेवमन्यंतइत्यपिद्रष्टव्यं । एतेपक्षाअयुक्ताएव कालप्रधानयोर्जडत्वेनकर्तृत्वायोगात् । रुद्रस्यपत्युरसामंजस्यादित्युक्तन्यायेनदोषित्वावगमात् । ब्रह्मणोप्येकोनारायणआसी न्नब्रह्मेत्यादिनाप्रलयेऽभावावगमेनजगत्कर्तृत्वायोगेनतेवादिनोमूढाइतिद्रष्टव्यं । अतोनारायणएवसर्वकर्तेतिपक्षःश्रेयानित्या शयः । ननुभगवतःइच्छामात्रेणैवयत्स्रष्टृत्वमुक्तंतदयुक्तं । प्रयोजनापेक्षयास्रष्टृत्वेपूर्णत्वापत्तेः । तदनपेक्षयास्रष्टृत्वेमूर्खत्वापत्ते

उप० । इच्छामात्रंप्रभोस्सृष्टिरितिसृष्टौविनिश्चिताः । कालात्प्रसूतिंभूतानांमन्यंतेकालचिंतकाः ॥ १४ ॥

रित्यतोऽत्रापिसिद्धांतंविवक्षुः पूर्वपक्षावाह ॥ भोगार्थमिति ॥ अतृप्तस्यैवविष्णोर्भोगार्थंभोगाख्यप्रयोजनायसृष्टिरित्यन्येप्राहुः । प्रलयेसर्वजगदभावेनैकस्यैवसतः ईश्वरस्यालस्यप्राप्तेस्तत्परिहारायक्रीडार्थंसृष्टिरित्यपरेरामानुजाः मन्यंतइत्यर्थः । क्रीडायाः आलस्यपरिहारार्थतायाः प्रसिद्धेरितिभावः । तत्रापिसिद्धांतमाह ॥ देवस्येति ॥ देवस्यैषोयंजगत्सर्जनादिरूपोव्यापारः क्रीडारूपत्वात्स्वभावएव नतेनप्रयोजनापेक्षेतिभावः । यथोक्तं लोकवत्तुलीलाकैवल्यमिति । ननुभोगार्थंक्रीडार्थंवासृष्टिः कस्मान्नस्यादित्यतआह ॥ आप्तकामस्येति ॥ आप्तकामस्यपूर्णकामस्यहरेः अतृप्तिप्रयुक्ताभोगार्थस्पृहा आलस्यपरिहारार्थंवाजातक्रीडार्थंचास्पृहा इच्छा का नकापीत्यर्थः । तथाचभगवत्सृष्टेः स्वप्रयोजनाभावेपिपरप्रयोजनापेक्षत्वमस्त्येवेतिभावः । यथोक्तं । सोयंविहारइहमेतनुभृत्स्वभावसंभूतयेभवतीति । व्याख्यातंचैतद्वाक्यंसुधायां । तदनेनपारमेश्वरीसृष्टिर्योग्यानांस्वगुणज्ञापनार्थेत्युक्तंभवतीति ॥ १९ ॥ इतिमांडूकखंडार्थेप्रथमः खंडः ॥ १ ॥ एवंविश्वादीनांत्रयाणांमहिमानंनिरूप्यतुरीयस्यतन्निरूपयंति ॥ नांतःप्रज्ञमित्यादिना ॥ तत्रजागरितस्थानः स्वप्नस्थानः सुषुप्तस्थानइतिविश्वादीनांस्थानोक्तिवत्तुरीयस्यस्थानानुक्तेस्तद्दर्शयति ॥ विष्णुरिति ॥ द्वादशांतइत्यस्यमस्तकमारभ्योपरिगगनेद्वादशांगुलप्रदेशइत्यर्थइत्याहुः । वस्तुतस्तुनासिकामूलमारभ्योपरिद्वादशांगुलांतेमस्तकमध्यइत्यर्थः । परमात्माचतूरूपः सर्वप्राणिशरीरगइतिपूर्वमुक्तत्वादितिध्येयं । तुरीयस्यका

उप० । भोगार्थंसृष्टिरित्यन्येक्रीडार्थमितिचापरे । देवस्यैषस्वभावोयमाप्तकामस्यकास्पृहेति ॥ १९ ॥
भा० । विष्णुस्तुरीयरूपेणद्वादशांतेव्यवस्थितः ।

यैवदन्नदृष्टमित्येतत्सर्वथाऽदृष्टमित्यन्यथाप्रतीतिनिरासायव्याचष्टे ॥ **मुक्तानामिति** ॥ तथाच तुरीयोमोक्षदइत्युक्तंभवति । व्यवहारे व्यवहारदशायां संसारइतियावत् । तथाचामुक्तैरदृष्टमित्यर्थउक्तोभवति । ननुसर्वथादृष्टमित्येवार्थःकिंनस्यादित्याशंकायांनेत्याह ॥ **सम्यगिति** ॥ प्राणाच्छ्रद्धामित्यादिनाषट्प्रश्नोक्ताःषोडशकलाः । तत्रमुख्यप्राणःषोडशसंख्यापूरिकाकला। तथाच सम्यक्भगवतिसमाहितमनसांध्यानवतां षोडशींकलांमुख्यप्राणं प्राप्तानां तत्परमानुग्रहवतामितियावत् । अतएवापरोक्षदृशां अपरोक्षज्ञानस्यतदनुग्रहैकसाध्यत्वात् । कर्तरिचेयंषष्ठी । तैर्जीवन्मुक्तैः पद्यतइतिपदंस्वप्राप्यंतुरीयंदृश्यतइत्यर्थः । तैरपिनसर्वदादृश्यते । किंतुप्रारब्धकर्मप्रतिबंधाभावदशायामेवेत्याशयेनोक्तं ॥ **क्वापीति** ॥ कालविशेषएवेत्यर्थः । पायुगुह्ययोरैक्येनदशेंद्रियपंचमहाभूताख्यंपंचदशकलाख्यदेहानुसंधानंविनायाषोडशीकलाजीवरूपा तांप्राप्तानांदेहाद्भेदेनस्वस्वरूपानुसंधानवतांस्फुटतरविवेकज्ञानवतां अतएवापरोक्षदृशामित्यप्याचार्याव्याचक्षते । नांतःप्रज्ञमित्यादिवाक्येंतःप्रज्ञबहिःप्रज्ञप्रज्ञानघनप्रज्ञशब्दानांचतुर्णामर्थमाह ॥ **अंतरिति** ॥ उभयतःप्रज्ञशब्दार्थमाह ॥ **बहिरिति** ॥ जानन्पश्यंश्चभवति जीवइतिशेषः । एतदवस्थाप्रेरकौविश्वतैजसावितिसंप्रदायविदः । नञामर्थमाह (नप्रज्ञइत्यस्यार्थमाह) ॥ एतत्सर्वमिति ॥ नाप्रज्ञंइत्यस्यार्थमाह ॥ **सर्वेति** ॥ स्वयोग्यतानुसारेणपूर्णज्ञानप्रदइत्यर्थः । तथाच चरमदेहमुत्सृ

भा० । मुक्तानांप्राप्यरूपोसौव्यवहारेनदृश्यते। सम्यक्समाहितानांतुप्राप्तानांषोडशींकलां । अपरोक्षदृशांकापितुरीयंदृश्यतेपदं । अंतर्बहिश्चसौप्तंचसमाधिज्ञानमेवच। बहिःशब्दादिकंजानन्पश्यन्स्वप्रंतथैवच। यदाभवतिसावस्थाह्युभयज्ञानशब्दिता। एतत्सर्वंतुरीयेणरूपेणनकरोत्यजः। सर्वज्ञान

ज्यगच्छतामप्रज्ञोज्ञानाप्रदोनभवतीतिनाप्रज्ञइत्युच्यतइत्यर्थोद्रष्टव्यः । अदृष्टमित्यस्यार्थंप्रमाणांतरेणदर्शयति ॥ **अमुक्तस्यत्विति** ॥ कर्तरिषष्ठी । तुशब्दोविशेषार्थः । वाशब्दोवधारणे तथाचविशेषेणषोडशींकलामृतेमुख्यप्राणानुग्रहमंतरेणअपरोक्षज्ञानाभावेनजीवन्मुक्तत्वाभावात् । तेनादृश्यत्वादेवेत्यर्थः । देहादिनास्फुटतरविवेकरूपस्यषोडशकलाख्यजीवस्वरूपानुसंधानरूपापरोक्षज्ञानस्यतदनुग्रहैकसाध्यत्वादपरोक्षज्ञानसाधनस्याभावेनामुक्तस्येत्यर्थइत्यप्यार्याः । अव्यवहार्यमित्यस्यार्थमाह ॥ **ग्रहणादेरिति** ॥ उपादानादिरूपव्यवहारस्येत्यर्थः ॥ **विनामुक्तिमिति** ॥ मुक्तौतुभगवद्ग्रहणादिकंभक्तस्यास्तीतिभावः । तथाचाग्राह्यत्वमव्यवहार्यशब्दार्थइतिद्रष्टव्यं । अलक्षणमित्यस्यार्थमाह ॥ **जाग्रदादीति** ॥ आदिपदेनस्वप्नसुषुप्तिसंग्रहः । अलक्षणमचिंत्यमित्यनयोर्हेतुहेतुमद्भावइत्याह ॥ **अचिंत्यइति** ॥ ततएव अनुमापकधर्मराहित्यादेव । अनुमित्याख्यचिंताऽविषयइत्यर्थः । अचिंत्यमव्यपदेश्यमित्यनयोरपिहेतुहेतुमद्भावइत्याह ॥ **ततएवेति** ॥ अचिंत्यत्वादेवेत्यर्थः । व्यवहारस्यव्यवहर्तव्यज्ञानसाध्यत्वादितिभावः । नन्वलक्षणमित्यस्यसर्वथालक्षणरहितमित्येवार्थःकिंनस्यादित्यतआह ॥ **चिदानंदेति** ॥ मुक्तस्यसर्वव्यापारहेतुत्वाख्यलक्षणसद्भावाच्चनसर्वथालक्षणराहित्यंतदर्थइत्याशयेनाह ॥ **मुक्तस्येति** ॥ ऐका

भा० । प्रदश्चापिमुक्तस्यैवतुरीयकइतिब्रह्मांडे । अमुक्तस्यत्वदृश्यत्वात्षोडशींवाकलामृते । तुरीयोऽदृष्टइत्युक्तोग्रहणादेरगोचरः । विनामुक्तिंततस्तेनाव्यवहार्यइतीरितः । जाग्रदादिप्रवृत्तिस्तुलक्षणंह्यनुमापकं । अलक्षणस्तद्राहित्यादचिंत्यस्ततएवच। ततएवह्यनिर्देश्यश्चिदानंदैकलक्षणः। मुक्तस्यसर्वव्यापारहेतुरेवतुरीयकः ।

त्म्यप्रत्ययसारमित्यत्रऐकात्म्यंचासौप्रत्ययश्चासौसारश्चेतिविग्रहमभिप्रेत्यैकात्म्यादिपदानामर्थमाह ॥ **एकइत्यादिना** ॥ तदेव प्रधानपूर्णत्वमेव । प्रपंचोपशममित्यत्रप्रपंचश्चासावुपशमश्चेतिविग्रहमभिप्रेत्यप्रपंचोपशमशब्दयोरर्थमाह॥ **प्रपंचइति** ॥ प्रपंच शब्दस्यविस्तारवाचित्वाद्विस्तृतेरित्युक्तं । देशतःकालतोगुणतश्चेत्यर्थः । शमआनंदरूपतइत्यस्मात्पूर्वंउच्छब्दापरपर्यायउपश ब्दउत्कृष्टवाचीतिपूरणीयं । एवंउपशमशब्दयोरर्थमुक्त्वावाक्यार्थमाह ॥ **उत्कृष्टानंदरूपत्वादिति** ॥ तथाच सारपदेनाग तार्थतेतिद्रष्टव्यं । उत्कृष्टत्वंचात्रापरिच्छिन्नत्वंविवक्षितं । ननिर्दुःखत्वं । तेननशिवशब्देनगतार्थतेतिमंतव्यं । उपशब्दइतिनामै कदेशग्रहणेनामग्रहणं । भीमोभीमसेनइतिवत् । तथाच उपशमशब्दवाच्यइत्यर्थः । प्रपंचस्यदेहबंधरूपस्योपशमोनाशोयस्मा द्भवति असौप्रपंचोपशमइत्यर्थांतरमप्याह ॥ **प्रपंचमिति** ॥ **तेनापीति** ॥ अनेननिर्वचनेनापीत्यर्थः । सारोपशमशब्दागता र्थतयाशिवशब्दार्थमाह ॥ **निर्दुःखेति** ॥ शिवशब्दःशिवशब्दवाच्यःश्रुतौश्रुतइत्यर्थः । नविद्यतेद्वैतंभिन्नंयस्मात्तदद्वैतमित्य न्यथाप्रतीतिनिरासायाद्वैतशब्दार्थमाह ॥ **अन्यथाप्रत्ययइति** ॥ वस्तुगतयाथार्थ्यापेक्षयेतिशेषः । शमयेत् मुक्तिदानेनज्ञान दानेनवेति । अन्यथाप्रत्ययस्यकथंद्वैतशब्दवाच्यत्वमित्यतःप्रमाणांतरेणतद्दर्शयति ॥ **अपेक्ष्येति**॥ वस्तुयाथार्थ्यमपेक्ष्ययान्य

भा० । एकःप्रधानउद्दिष्टआत्मापूर्णत्वतःश्रुतः । तदेवास्यस्वरूपंयदैकात्म्यंतेनकीर्तितः । प्रत्ययोज्ञानरूपत्वात्सारआनंदरूपतः । प्रपंचोवि स्तृतेर्विष्णुःशमआनंदरूपतः । उत्कृष्टानंदरूपत्वादुपशब्दःप्रकीर्तितः । प्रपंचंदेहबंधाख्यंतुरीयःशमयेद्यतः । प्रपंचोपशमस्तेनाप्युक्तःसभगवान्प्रभुः । निर्दुःखसुखरूपत्वाच्छिवशब्दःश्रुतौश्रुतः । अन्यथाप्रत्ययोद्वैतंशमयेत्तंयतोहरिः । अद्वैतस्तेनचोद्दिष्टस्तुरीयःपुरुषोत्तमइतिमाहात्म्ये । अपेक्ष्यवस्तुया थार्थ्यद्वित्वमन्यस्वरूपता । इण्गताविवितिधातोश्चतज्ज्ञानंद्वैतमुच्यतइतिसंकल्पे ।

स्वरूपतासाद्वित्वं । वस्तुयाथार्थ्यमपेक्ष्यद्वितीयःप्रकारइत्यर्थः । तद्वीत्युच्यतइतिग्राह्यं । इण्गताविविधातोर्भावेक्तप्रत्ययेइतशब्देन ज्ञानमुच्यतइत्यपिग्राह्यं । एवंपदार्थमुक्त्वावाक्यार्थमाह ॥ **तज्ज्ञानमिति** ॥ तथाचवस्तुगतयाथार्थ्यापेक्षयाद्वितीयेनप्रकारेण ज्ञातंद्वीतं । स्वार्थेचाण्प्रत्ययेद्वीतमेवद्वैतमुच्यतइत्यर्थः । सआत्मासविज्ञेयइतितुरीयस्यैवात्मत्वादिकमुच्यतइत्यन्यथाप्रतीति निरासायव्याचष्टे ॥ **सआत्मेति** ॥ सोयमात्माचतुष्पादितिविश्वादिरूपेणचतुर्धाविभक्तएवसआत्मासविज्ञेयइत्युच्यते । तत्कि मर्थमित्यतउक्तं॥**उपसंहारार्थमिति**॥चतुष्पात्स्वरूपनिरूपणोपसंहारार्थमित्यर्थः । ननूपसंहारार्थमित्ययुक्तं । सोयमात्माध्यक्ष रमित्यादिनापुनस्तत्स्वरूपनिरूपणस्यक्रियमाणत्वेनतत्समाप्त्यनंतरमुपसंहारस्यकर्तुमुचितत्वादित्यतआह ॥ **सोयमिति** ॥ वि श्वादीनांप्रणवांशाकारादिप्रतिपाद्यत्वंवक्तुंसोयमित्यादेःप्रकरणांतरारंभार्थत्वान्नपूर्वप्रकरणेनैकवाक्यता । अतउपसंहारार्थमि त्युक्तंयुक्तमितिभावः । सआत्मासविज्ञेयइत्युक्तमात्मत्वादिकंविश्वादिरूपचतुष्टयसाधारणं नतुतुरीयस्यैवेत्यत्रप्रमाणमाह ॥ **विश्वादिरूपइति** ॥ निर्विशेषोपि इंद्रार्जुनादिवद्विशेषरहितोपि । केवलंविशेषबलेनचतुर्धासमुदीरितइत्यर्थः । निर्विशेषोपि निर्भेदोपीतिवा ॥ १ ॥ नांतःप्रज्ञमित्यादिनोक्तार्थेप्रमाणत्वेनसलिलेश्वरोदाहृतश्लोकेष्वादौप्रपंचोपशममित्यस्मिन्नर्थेसंमतितयो दाहृतेनिवृत्तेरितिश्लोकेपदानांव्यवहितत्वात्प्रभुशब्दार्थंवदन्नेवान्वयंदर्शयति ॥ **सर्वदुःखानामिति** ॥ कारणभूतइतिप्रभुश

भा० । सआत्मासविज्ञेयइतिसोयमात्माचतुष्पादितिचतुर्धाविभक्तउच्यते उपसंहारार्थं । सोयमात्माध्यक्षरमितिपृथगारंभात् । विश्वादिरूपो यस्त्वात्मासविज्ञेयोमुमुक्षुभिः । निर्विशेषोपिभगवांश्चतुर्धासमुदीरितइतिप्रत्यये । सर्वदुःखानांनिवृत्तेःकारणभूतस्तुरीयोदेवः ।

ब्दार्थकथनं । ननुतुरीयस्यसर्वदुःखनिवृत्तिकारणत्वंकुतइत्यतआह ॥ **हरिरिति** ॥ मोक्षदत्वात्सर्वदुःखनिवृत्तिकारणत्वमिति भावः । सर्वभावानांदेवइत्यस्यार्थमाह ॥ **देवइति** ॥ सर्वभावानामित्यस्यार्थोजीवानामिति । कर्तरिषष्ठी ॥ **गम्यत्वादिति** ॥ देवइत्यस्यदिवूक्रीडाविजिगीषाद्युतिस्तुतिमोदमदस्वप्नकांतिगतिष्वितिधातुव्याख्यानादितिभावः । तथाचदिवुधातोर्घञर्थेकवि धानमितिवार्तिकेनकर्मणिकप्रत्ययेककारलोपेकित्वेपिच्छांदसत्वाद्गुणेचसतिनिष्पन्नोदेवशब्दोगम्यत्ववाचीतिज्ञातव्यं । सर्वभा वानामित्यस्यसर्वजीवानामित्यर्थउक्तस्तत्रजीवानांकथंभावशब्दवाच्यत्वमित्यतआह ॥ **भावाजीवाइति** ॥ भवंतिदेहसंबंधे नोत्पद्यंते । ईशानइत्यस्यार्थमाह ॥ **ईशानामपीति** ॥ ईशानांमुक्तानामननात् । अनचेष्टायामितिधातोश्चेष्टकत्वादीशानः श्रुतइतियोजना ॥ २ ॥ नांतःप्रज्ञंनबहिःप्रज्ञंनप्रज्ञानघनमितितुरीयस्ययद्विश्वादिभ्यस्त्रिभ्योवैधर्म्यमुक्तं तत्रसंमतितयोदाहृते कार्यकारणबद्धौतावितिमंत्रेविश्वादीनांत्रयाणांबद्धत्वमुच्यते । तदयुक्तं । सर्वमानविरोधादित्यतोबद्धत्वोक्तेरभिप्रायंप्रमाणेनद र्शयति ॥ **कार्यकारणबंधस्येति** ॥ जीवनिष्ठकार्यकारणबंधस्येत्यर्थः । खंडार्थकथनसमयेइदंप्रपंचयिष्यामः । तदधीनत्वतइ त्यनेनतदधीनत्वादर्थवदितिन्यायंसूचयति । उक्तंचानुव्याख्याने । दुःखिबद्धावराद्यास्तुतदधीनत्वहेतुतः । शब्दाब्रह्मणिवर्त

भा० । हरिस्तुरीयरूपेणमोक्षदःपरिकीर्तितः । देवःससर्वजीवानांगम्यत्वात्समुदीरितः । भावाजीवाःसमुद्दिष्टाभवंत्येतेयतोविभोः । ईशानामपि मुक्तानामीशानःसोननाच्छ्रुतइतिप्रत्याहारे । कार्यकारणबंधस्यतदधीनत्वतोविभुः । विश्वादिरूपोभगवान्बद्धइत्युच्यतेश्रुतौ ।

तइति । श्रुतौ कार्यकारणबद्धावितिश्रुतौ । प्रतीतएवार्थःकिंनस्यादित्यतआह ॥ **कुतइति** ॥ बंधेशस्यबंधदातृतयातत्स्वामि नः । बंधयतीतिबद्धइतिकर्तृव्युत्पत्त्यापिबद्धादिशब्दवाच्यत्वंहरेरितिभावेनश्रुतिंपठति ॥ **सबद्धइत्यादिना** ॥ उक्तंचन्यायवि वरणे । प्रसिद्धत्वात्कर्तृव्युत्पत्तेरिति । किंचयदिहरेर्बद्धत्वमेवश्रुत्यर्थः तर्हिश्रुतीनांयद्भगवद्गुणोत्कर्षेमहातात्पर्यंतद्विरुध्येत । ननु गुणोत्कर्षएवमहातात्पर्यंश्रुतीनांकुतइतिचेत्तत्राह ॥ **विष्णोरिति** ॥ सुरान्प्रतिवेदाभिमानिसरस्वतीवाक्यमिदं । अतोममेति युक्तं । गुणोक्तिपरता गुणोक्तौतात्पर्यवत्त्वमित्यर्थः । हेसुरेश्वराः । ननुकथमेतत् वैष्णवानांब्रह्मादीनामपिमहिम्नःप्रतिपादना दित्यतआह ॥ **तदर्थमिति** ॥ यदावैष्णवानांब्रह्मादीनामित्थंमहिमा तदाकिंवाच्यं विष्णुरपारमहिमइत्येवंरूपेणविष्णोर्गुणो त्कर्षप्रतिपादनार्थमित्यर्थः । अन्यद्वचनं भगवदितरेषांगुणोत्कर्षप्रतिपादकंवचनं । यथोक्तं । चरितंवैष्णवानांचविष्णूद्रेकायक थ्यतइति । तस्य गुणोत्कर्षस्य । मम संमतः । सरस्वतीतिमन्नामनिर्वचनपर्यालोचनयापिममविष्णोर्गुणोत्कर्षएवमहातात्प र्यमित्याशयेनाह ॥ **सेति** ॥ **तत्सरणादिति** ॥ तस्यभगवद्गुणोत्कर्षविरोध्यर्थस्यसरणात् अपसारणात् अहंसरस्वतीत्यर्थः । यद्वासृगतावितिधातोस्तांविष्णुगुणोत्कर्षोक्तिंप्रत्येवममसदागमनादहंसरस्वतीत्यर्थः । ननुसरःसरणंअस्याअस्तीत्यर्थेसरस्शब्दा

भा० । कुतोबंधःपरस्यास्यबंधेशस्यचिदात्मनइतिच । सबद्धःसदुःखीसबंधयतिसदुःखयतीति । सजीवःसप्रकृतिःसजीवयतिसप्रकरोतीति । सोवरःसोनित्यःसोवरयतिसोनित्यतीतिकौषारवश्रुतिः । विष्णोर्गुणोक्तिपरताममनित्यंसुरेश्वराः । तदर्थमन्यद्वचनमतस्तस्यविरोधियत् । तन्ममार्थो नहिकापिसाहंतत्सरणात्सदा । सरस्वतीतिसंप्रोक्तातस्माज्ज्ञेयाहरेर्गुणाइतिमहोपनिषदि ।

न्मतुप्प्रत्ययेसरस्मतीतिस्यादितिचेदुच्यते । मादुपधायाश्चमतोर्वोयवादिभ्यइत्यनेनमतुपोमकारस्यवकारांगीकारात् । तथाचस
रसूशब्दात्तदस्यास्तीत्यर्थेमतुप्प्रत्ययेउपूइत्यस्यलोपेमकारस्यवकारेसरस्वदितिजातेस्त्रीत्वविवक्षायांङीपिसरस्वतीतियुक्तमित्यवगं
तव्यं । संप्रोक्तायस्मादितिशेषः । गुणाः गुणाएववेदप्रतिपाद्यत्वेनज्ञेयाः ॥ ३ ॥ नप्रज्ञानघनमित्युक्तेप्राज्ञाद्वैधर्म्ये संमतितयो
दाहृतंनात्मानमितिमंत्रं प्राज्ञःकिंचनसंवेत्तीत्यस्यापवादप्रदर्शनपूर्वकंप्रमाणेनैवव्याचष्टे ॥ नात्मानमिति ॥ स्वस्वरूपमित्य
र्थः । परान् वक्ष्यमाणजीवकालादिव्यतिरिक्तान्पदार्थान् । संवेदयेदित्यनेनसंवेत्तीत्येतत्णिजंततयाव्याख्येयमितिसूचयति ।
जीवकालाभ्यांसहितंतमः जीवकालतमः प्रदर्शयेत् । सुप्तावितिशेषः । नाप्रज्ञमित्युक्तेसर्वज्ञानप्रदत्वेसंमतितयोदाहृतं तुर्यंतत्स
र्वदृक्सदेतिमंत्रंव्याचष्टे ॥ सर्वंत्विति ॥ स्वस्वरूपादिकंसर्वंयोग्यमित्यर्थः । दर्शयेदितिवचनेनसर्वदृगित्येतदपिणिजंतमित्यु
क्तंभवति । ननुबंधकेबद्धशब्दः तथाऽसंवेदयितरिनसंवेत्तीतिकर्तृशब्दः तथासर्वप्रदर्शयितरिसर्वदृगितिचकर्तृशब्दः कस्मान्न
युज्यते । अनुशासनाभावादित्यतआह ॥ स्वतंत्रइति ॥ स्वतंत्रःकर्तेतिवचनात्क्रियायांयःस्वतंत्रःतस्मिन्कर्तृशब्दःस्यात् क
र्तेतिमुख्यःकर्तृशब्दप्रयोगःस्यात् । अत्रैतदुपनिषदुक्तमेवोदाहरणंदर्शयति ॥ प्राज्ञस्येति ॥ यथाऽसंवेदयितुःप्राज्ञस्यनसंवेत्ती
त्यसंवेदनक्रियांप्रतिमुख्यतःकर्तृत्वंकथ्यते । इतरेषामसंवेदनरूपक्रियाप्रदानेप्राज्ञस्यैवस्वातंत्र्यात् । तथाचसर्वप्रदर्शकेतुरीयेसर्व

भा० । नात्मानंनपरांश्चैवनसत्यंचापिनानृतं । प्राज्ञःसंवेदयेत्किंचिज्जीवकालतमोविना । सुप्त्यवस्थांसुखंचापिविनानान्यत्प्रदर्शयेत् । सर्वंतुदर्श
येन्मुक्तौतुरीयःपरमेश्वरइतिप्रत्यये । स्वतंत्रेकर्तृशब्दःस्यात्प्राज्ञस्यावेदनंयथा । सर्वप्रदर्शकेचैवतुरीयेसर्वदर्शनमितिब्रह्मतर्के ।

दृगितिसर्वविषयकदर्शनक्रियांप्रतिमुख्यतःकर्तृत्वमुच्यते। इतरेषांदर्शनक्रियाप्रदानेतुरीयस्यैवस्वतंत्रत्वादित्यर्थः। तथाचब्रह्मतर्क वाक्येस्वतंत्रेकर्तृशब्दःस्यादितिस्वोक्तार्थेदृष्टांतत्वेनैतद्वाक्योक्तप्रमेयस्योपादानात्संवेत्ति सर्वदृगितिपदद्वयंणिजंतत्वेनैवव्याख्येय मितिभावः। एवंबंधनरूपक्रियायांईश्वरस्यैवस्वतंत्रत्वेनबंधस्यतदधीनत्वात्तदधीनत्वादर्थवदितिन्यायेनबद्धशब्दप्रयोगोपियुक्त इत्यवगंतव्यं॥४॥नात्मानमित्यादिनाप्राज्ञतुरीययोर्वैधर्म्यमुक्त्वा प्रकारांतरेणापिवैधर्म्यंप्रतिपादयितुंप्रवृत्तेबीजनिद्रेतिमंत्रे प्राज्ञस्य मूलाज्ञानयुक्तत्वंप्रतीयते। तामपाकुर्वन्निद्रायुतत्वोक्तेरभिप्रायंप्रमाणेनैवदर्शयति॥निद्रायुताइति॥ प्राज्ञस्योक्तंनिद्रायुतत्वंविश्व तैजसयोरपिसाधारणमित्याशयेनविश्वाद्याइत्युक्तं। सानिद्रा। भृत्ययुतइति। भृत्यस्यतदधीनत्वात् भृत्ययुतःस्वामीत्युच्यतेयथेत्य र्थः। प्राज्ञःकिंचनसंवेत्तितुर्यंतत्सर्वदृक्सदेतिविरुद्धधर्मप्रतिपादनेनप्रसक्तांभेदशंकांनिराकरोति ॥ अभेदमपीति॥ अभेदेपिभेद कार्यकारिरूपाद्विशेषतोऽभेदमपिअभिन्नमपितद्ब्रह्मबहुरूपमितिसंबंधः। ननुरूपाणामभेदे एतत्सर्वंतुरीयेणरूपेणनकरोति विश्वा दिरूपेणकरोतीति कथंव्यवहारइत्यतःसोपिविशेषशक्तितएवेत्याह॥करोतिनकरोतीति॥स्वशक्तितःस्वाभिन्नविशेषशक्तितइत्य र्थः। अघटितघटनासामर्थ्यादितिवा। तुर्यंतत्सर्वदृगितिवाक्येसर्वदृगित्येतत्सर्वंदर्शयेदिति व्याख्यातं। णिजंततामनंगीकृत्य व्याख्यानेबाधकमाह॥ संवेदयतीति॥ सर्वदृगित्यस्यसंवेदयतीत्यर्थास्वीकारइत्यर्थः। विदज्ञानेदृशिर्प्रेक्षणइतिधात्वोरेका

भा०। निद्रायुतास्तुविश्वाद्यास्तदधीनायतोहिसा। यथाभृत्ययुतःस्वामीनह्यज्ञानंपरात्मनइतिच। अभेदमपितद्ब्रह्मबहुरूपंविशेषतः। करोतिनक रोतीतिव्यवहार्यंस्वशक्तितइतिच। संवेदयतीत्यस्वीकारेतुर्यंतत्सर्वदृक्सदा। द्वैतस्याग्रहणंतुल्यमुभयोःप्राज्ञतुर्ययोरितिचविरुद्धं।

र्थत्वाद्दर्शयतीत्यस्वीकारइतिवक्तव्येसंवेदयतीत्यस्वीकारइत्युक्तमितिज्ञातव्यं।तुरीयंसर्वदृगितितुरीयस्यसार्वज्ञमुक्त्वाऽग्रहणंतुल्य
मितितुरीयस्याज्ञानोक्तेर्विरुद्धत्वंस्यात् । ज्ञानाज्ञानयोरेकत्रविरुद्धत्वादतोदर्शयेदित्येवव्याख्येयमित्यर्थः । दर्शयतीत्यस्वीकारइ
त्यपिक्वचित्पाठः । ननुप्राज्ञतुरीययोर्द्वैताग्रहणंवाकथमुच्यते । तयोरज्ञानाभावादित्यतस्तद्वाक्यंव्याचष्टे ॥ द्वैतग्रहणेति ॥
प्राज्ञतुरीययोर्द्वैतस्यदेहादिविषयस्वातंत्र्यस्ययद्ग्रहणंतद्विषयकंयज्ज्ञानंभ्रमरूपंतदकारणत्वंतुल्यमित्यर्थः । प्राज्ञंतुरीयंचप्राप्ता
नांदेहादिविषयस्वातंत्र्यभ्रमोनभवतीतितदकारणत्वमुभयोरितिभावः । द्वैतस्याग्रहणंतुल्यमित्येतद्द्वैतग्रहणाकारणत्वंतुल्यमि
त्यर्थइतिव्याख्यातं । तत्रप्रमाणंचाह ॥ द्वैतमिति ॥ नग्राहयेदित्युक्त्याद्वैतग्रहणाकारणत्वमितिव्याख्येयमितिसूचितंभवति ।
बीजनिद्रायुतःप्राज्ञइत्येतत्प्रमापयति ॥ द्वैतग्रहणेति ॥ प्राज्ञंसमाश्रिता प्राज्ञाधीनेत्यर्थः ॥ ५ ॥ ६ ॥ नन्वेतादृशस्यतुरीय
स्यप्राप्तिःकदेत्याशंकापरिहारायान्याथगृह्णतइतिमंत्रःप्रवृत्तः । तस्यायमर्थः । तत्वंस्वतंत्रतत्वंभगवंत मजानतःपुंसोयानिद्राअ
विद्याऽस्ति तयाअन्यथागृह्णतःअहंममेत्यादिजाग्रत्कालीनस्वातंत्र्यभ्रमयुक्तस्य स्वप्नःस्वप्नदर्शित्वं भ्रमोभवति । जाग्रदवस्था
यांस्वातंत्र्यादिविषयकभ्रमजन्यसंस्कारेणजाग्रत्कालीनमिदमितिस्वप्नरूपोभ्रमोभवतीति । तदेतत्तात्पर्यमाह ॥ विपरीतज्ञा
नादिति ॥ नन्वनाद्यविद्याबद्धस्यजीवस्यजाग्रत्स्वप्नयोर्भ्रमयोर्विपर्यासक्षयएवकथंस्यात् इत्याशंकायां यदासद्गुरूपदेशादिना

भा० । द्वैतग्रहणाकारणत्वंतुल्यमित्यर्थः । द्वैतंनग्राहयेत्तुर्योनचप्राज्ञःकथंचन । द्वैतग्रहणबीजंतुनिद्राप्राज्ञंसमाश्रितेतिप्रकटश्रुतिः । विपरी
तज्ञानादपिविपरीतज्ञानांतरंजायते ॥ ७ ॥

भगवत्प्रबोधोदयस्तदानीमेवेत्याशयेनप्रवृत्तं अनादिमाययेतिवाक्यंमायाशब्दस्यानिर्वचनीयाविद्यापरत्वप्रतीतिनिरासायप्रमा
णेनैवव्याचष्टे ॥ अनादीति ॥ तया तत्प्रसादेनेतियावत् । प्रबोधंश्रवणादिकं । आयातिप्राप्नोतिगुरूपदेशेन । अद्वैतंबुध्यते
तदेत्यस्यार्थः तदाविष्णुंप्रपश्यतीति ॥ ८ ॥ ननुअहंममेत्यादिस्वस्वामिभावसंबंधरूपःप्रपंचःयदिजीवस्वभावःस्यात्तदाभगवत्प्र
सादादपिकथमसौनिवर्त्यतेत्याशंकायांसनजीवस्वभावःकिंत्वाभिमानिकोभगवदिच्छाधीनएवातस्तस्यतज्ज्ञानजनितात्तत्प्रसादा
न्निवृत्त्युपपत्तिरित्याशयेनप्रवृत्तेप्रपंचइतिश्लोकेआद्यमर्धमन्यथाप्रतीतिनिरासायव्याचष्टे ॥ तन्वेत्यादिना ॥ प्रपंचइत्यनूद्य
तन्वेत्यादिव्याख्यातं । शरीरिणोस्यजीवस्य । तन्वा देहेन । निरूपितोयःस्वस्वामिभावसंबंधोसौवस्तुतोजीवस्वभावतोनैवा
स्ति । जीवस्यस्वाभाविकोनभवतीत्यर्थः । कुतइत्यतआह ॥ परमस्येति ॥ तर्ह्यहमेतत्स्वामीदंचदेहादिकंमदीयमितिप्रतीतिः
कथमित्यतआह ॥ तथापीति ॥ यद्यपिजीवस्यावास्तवोभगवदधीनश्चतथापीत्यर्थः । एषःस्वस्वामिभावसंबंधः । अभिमा
नात्स्वस्मिन्स्वातंत्र्यारोपादित्यर्थः । अज्ञानादित्यर्थइत्यप्याहुः । अतःस्वस्वातंत्र्यारोपेणपरिदृश्यमानत्वादित्यर्थः । अज्ञानेन
दर्शनादित्यर्थइत्यप्याहुः । सःस्वस्वामिभावसंबंधाख्यःप्रपंचोविद्यतेऽस्वाभाविकतया अभगवद्वशतयाचास्तीत्यंगीकारोयदिभ

भा० । अनादिमाययाविष्णोरिच्छयास्वापितोयदा । तयाप्रबोधमायातितदाविष्णुंप्रपश्यतीतिप्रकाशिकायां । तन्वास्वस्वामिसंबंधःप्रपंचो
स्यशरीरिणः । वस्तुतोसौनचैवास्तिपरमस्यवशेयतः । तन्वादिकस्तथाप्येषह्यभिमानात्प्रदृश्यते। अतस्सविद्यतइतिह्यंगीकारोभवेद्यदि। तथापिभगव
ज्ज्ञानात्सनिवर्तेदसंशयइतिब्रह्मतर्के ।

वेदित्यर्थः । निवर्तेतेत्यत्रकस्मादितिनज्ञायतेऽतोभगवज्ज्ञानादितिपूरितं । चंद्रादयस्तुमन्यंतेसर्वस्मादुभयंपदमितिवचनान्निव
र्तेदितियुक्तमितिज्ञातव्यं । भगवज्ज्ञानादपिकथंतन्निवृत्तिरित्यतोभगवदिच्छाधीनत्वात्तस्यतदिच्छयैवनिवृत्तिर्युक्तेत्याशयेनप्र
वृत्तंमायामात्रमित्यर्धंस्ववाक्येनव्याचष्टे ॥ **अद्वैतमित्यादिना** ॥ महद्भिरितिशेषः । अन्यथावस्तुस्वरूपापेक्षयाद्वितीयेनप्रका
रेणमहद्भिर्नज्ञातंयत्परब्रह्मादिवस्तुतदद्वैतमित्यर्थः । अद्वैतंद्वैतमित्यन्वयमभिप्रेत्यद्वैतमित्यस्यार्थमाह ॥ **तदिति** ॥ अद्वैत
शब्दोक्तंपरब्रह्मादिवस्त्वित्यर्थः । यस्मादितिशेषः । द्विधा वस्तुतत्वापेक्षया । अज्ञैःअसज्जनैः ॥ **अन्यथाज्ञातमिति** ॥ भ
गवन्निष्ठस्वामित्वस्यस्वस्मिन्नेवज्ञानेनभगवत्यज्ञानादन्यथाऽस्वामित्वेनज्ञातमित्यर्थः । तेषामन्यथाज्ञानेनिमित्तंवक्तुंप्रवृत्तंपरमा
र्थतोमायामात्रमिति । तत्रपरमार्थतइतियथास्थितपदार्थतावदाह ॥ **परमेश्वरादिति** ॥ परमार्थतोमायामात्रमित्यन्वयमंगी
कृत्यतसेःसार्वविभक्तिकत्वात्षष्ठ्यर्थेतसिरितिभावेनव्याचष्टे ॥ **तस्यैवेत्यादिना** ॥ तस्मादितिश्रुतौशेषोक्तिः । तथाचयन्मह
द्भिरनन्यथाज्ञातत्वादद्वैतंब्रह्म तत्द्वैतं अज्ञैरन्यथाज्ञातं तच्चान्यथाज्ञानंपरमार्थतः परमेश्वरस्य मायामात्रंइच्छानिर्मितं यस्मा
त्तस्मात्तदिच्छयैवनिवर्ततइत्यर्थः । मायामात्रमित्यादिवाक्यंस्ववाक्येनव्याख्यातं तत्रप्रमाणंचाह ॥ **परेणेति** ॥ महद्भिरिति

भा० । अद्वैतमन्यथाज्ञातंपरब्रह्मादिवस्तुयत् । द्वैतंद्विधाज्ञातं अन्यथाज्ञातमज्ञैः । परमार्थतःपरमेश्वरात् । तस्यैवमायामात्रंतदिच्छयानिर्मितं ।
तदन्यथाज्ञानंतस्मात्तदिच्छयैवनिवर्तते । परेणब्रह्मणायत्तुद्विधानज्ञातमंजसा । तदद्वैतंपरंब्रह्मतदेवज्ञातमन्यथा। जीवेनद्वैतमुद्दिष्टंमिथ्याज्ञानंतदेवच।
परमार्थात्पराद्विष्णोर्जातमिच्छावशादनु ।

शेषः । यस्मात्कारणात्यत्प्रसिद्धंभगवत्स्वरूपंपरेणब्रह्मणाप्रसन्नेनतत्प्रसादादितियावत् । द्विधा वस्तुतत्वापेक्षयाअन्यथा महद्भिर्नज्ञातंप्रत्युतांजसैवज्ञातं । तस्मात्परंब्रह्माद्वैतमुच्यते । तदेवजीवेनाज्ञेनासज्जनेनान्यथाज्ञातंद्वैतमुद्दिष्टं । तन्मिथ्याज्ञानं परमार्थात् पंचमीषष्ठ्यर्थे परमार्थस्यविष्णोरिच्छावशादन्वेवजातं अतस्तदिच्छयैवनिवर्ततइतिशेषः। मायामात्रमित्येतदनिर्वचनीयाविद्यानिर्मितमित्यन्यथाप्रतीतिनिरासायतदिच्छानिर्मितमितिप्राग्व्याख्यातं । तत्रप्रमाणमाह ॥ **मायेतीति** ॥ परमार्थतइत्येतत्परमेश्वरादितिप्राग्व्याख्यातं । तत्रपरमेश्वरस्यपरमार्थशब्दवाच्यत्वंकुतइत्यतआह ॥ **उत्तमत्वादिति**॥ अद्वैतमनन्यथाज्ञातमितिप्राग्व्याख्यातं । तत्कथमद्वैतशब्दाल्लभ्यतइत्यतआह ॥ **अनन्यथेति** ॥ अन्यथा वस्तुतत्वापेक्षयाप्रकारांतरेणेतिद्वीत्यस्यार्थः । इतमित्यनूद्यावगतमितिव्याख्यातं । अन्यथेतंनभवतीत्यनन्यथेतं तदेवचाद्वैतशब्दवाच्यमित्यर्थः । द्वैतंद्विधाज्ञातमितिप्राग्व्याख्यातं तत्कथंद्वैतशब्दाल्लभ्यतइत्यतआह ॥ **द्वैतमिति**॥द्वीत्यस्यार्थोद्विधेति । वस्तुतत्वापेक्षयाद्विधाप्रकारांतरंह्यन्यथेत्युच्यते । अन्यथेत्येतदावर्तनीयं । तथाचान्यथाप्रकारांतरेणज्ञातंयत्ततद्द्वैतमुच्यतेइत्यर्थइतियोज्यं । यद्वाद्विधाहीत्यनंतरंज्ञातमितिशेषः । वस्तुस्वरूपापेक्षयाद्विधाहिज्ञातंद्वैतं । तात्पर्यार्थमाह ॥ **अन्यथाज्ञातमित्यर्थइति** ॥ इतिवाक्यभेदेनव्याख्येयं ॥ ९ ॥ विकल्पोविनिवर्तेतेतिवाक्यंपूर्ववाक्यादनतिभिन्नार्थत्वात्पुनरुक्तमित्याशंक्योपसंहारार्थत्वान्नपुनरुक्तमित्यभिप्रेत्या

भा० । मायेतीच्छासमुद्दिष्टामायामात्रंतदुद्भवं । उत्तमत्वात्परार्थोसौभगवान्विष्णुरच्युतइतिच । अनन्यथाहतमवगतमद्वैतं द्वैतंवस्तुस्वरूपापेक्षयाद्विधाह्यन्यथाज्ञानमित्यर्थः ।

तइत्यध्याहारेणव्याचष्टे ॥ अतइति ॥ शरीरादिसंबंधःतन्निरूपितःस्वस्वामिभावसंबंधः । अपिशब्देनयदिशब्दस्ववस्तुत्वेह्य
स्वातंत्र्येचभण्यतइत्येकादशस्कंधतात्पर्योक्तस्यावस्तुत्वरूपार्थस्ययदिशब्दव्याख्यानस्यसंग्रहः । तथाचकल्पितत्वादेवयदिअव
स्त्वित्यर्थः । अस्वाभाविकइतियावत् । उपदेशाद्भगवदुपदेशरूपाद्गुरुवाक्यादपरोक्षज्ञानद्वारानिवर्ततइत्यर्थः । निवर्ततइत्यनंतर
मानंदाविर्भावरूपांमुक्तिंचैतीतिसिद्धमितिवाक्यशेषोद्रष्टव्यः । नन्वयमुपसंहारोनुपपन्नः । अज्ञानाकल्पितस्यविकल्पस्यभगवज्ज्ञा
नान्निवृत्त्यनंतरमानंदाविर्भावरूपांमुक्तिमेतीत्यस्यार्थस्याप्रामाणिकत्वादित्याशंकापरिहारायप्रवृत्तमयंवादइत्यादिवाक्यंव्याचष्टे॥
अयमिति ॥ इत्ययंसतांवादइत्यन्वयः । व्याख्यातार्थेप्रमाणंचाह ॥ विकल्पइति ॥ देहादिनिरूपितःस्वस्वामिभावसंबं
धोदेहसंबंधः। केनचित्कारणेन अज्ञानादिना। गुरुवाक्यात् भगवदुपदेशात् । ततआनंदमेत्यसाविवितिश्रुतौशेषोक्तिरित्यवगंतव्यं।
अत्रलिङ्गादीनांवस्तुस्थितिकथनपरत्वमेवाभिप्रेतंनप्रसंगार्थत्वमित्यवगंतव्यं । ननुतत्वनिर्णयादौप्रसंगार्थतयाश्लोकद्वयंस्वयमेव
व्याख्यायवस्तुस्थितिकथनपरतयापरकृतव्याख्यानेलिङ्गादीनांवैयर्थ्यमभिधायात्रपुनर्वस्तुस्थितिकथनपरतयाव्याख्यानेकथंनस्व
वचनविरोधइतिचेदयमभिप्रायोभाष्यकारस्य।सर्वथातर्कपरमेवेदंश्लोकद्वयंनवस्तुस्थितिकथनपरं।वस्तुस्थितिकथनपरत्वश्रद्धायाम
पिनत्वदुक्तिरीत्यावस्तुस्थितिकथनपरं । अप्रामाणिकत्वात्किंतुअस्मदुक्तरीत्यैवप्रामाणिकत्वादिति ॥ १० ॥ इतिमांडूकभाष्या

भा० । अतोविकल्पःशरीरादिसंबंधः । केनचिदज्ञानादिनाकारणेनकल्पितोप्युपदेशान्निवर्तते। अयंसतांवादः । ज्ञातेसतिपरब्रह्मणिद्वैतमन्यथाज्ञा
नंनिवर्ततइति । विकल्पोदेहसंबंधःकेनचित्कारणेनतु । कल्पितोविनिवर्तेतगुरुवाक्यादसंशयः । एषएवसतांवादोज्ञातेब्रह्मणितत्वतः । निवर्ततेन्य
थाज्ञानंततआनंदमेत्यसाविवितिच ।

र्थेद्वितीयःखंडः ॥ २ ॥ ततश्चायंखंडार्थः ॥ एवंविश्वादीनांत्रयाणांमहिमानंनिरूप्यतुरीयस्यतन्निरूपयति ॥ नांतःप्रज्ञमि
त्यादिना ॥ विश्वादिवत्तुरीयस्यस्थानानुक्तेर्नासिकामूलमारभ्यद्वादशांगुलांतेमस्तकमध्येतिष्ठतीतिस्थानंद्रष्टव्यं । मस्तकमार
भ्योपरिद्वादशांगुलिपरिमिताकाशप्रदेशेतिष्ठतीतितुरीयस्यस्थानंद्रष्टव्यमित्यप्याहुः । नांतःप्रज्ञंदेहांतस्थितायेस्वाप्नपदार्थाः ।
तान्नप्रज्ञापयतीतिनांतःप्रज्ञः तं। स्वप्नावस्थायाअकर्तारमित्यर्थः । नबहिःप्रज्ञंबहिस्थितायेपदार्थाजाग्रत्कालीनाः तान्नप्रज्ञाप
यतीति नबहिःप्रज्ञः तं। जाग्रदवस्थायाअकर्तारमित्यर्थः । नोभयतःप्रज्ञं बहिःशब्दादिकंजानातिअंतःस्वप्नंचपश्यति कस्यांचि
दवस्थायांतामुभयज्ञानशब्दवाच्यावस्थांचनप्रज्ञापयतीतिनोभयतःप्रज्ञः तं। एतदवस्थाप्रवर्तकौचविश्वतैजसाविवितिसंप्रदायविदः।
नप्रज्ञानघनं घनस्याज्ञानावृतस्यजीवस्य सुषुप्त्यवस्थाकालसुखानांचप्रज्ञापनंयस्मान्नभवत्यसौनप्रज्ञानघनःतं। सुषुप्त्यवस्थायाःअकर्ता
रमित्यर्थः। नप्रज्ञं प्रज्ञाशब्दोक्तासंप्रज्ञातसमाध्यवस्थाज्ञानंयस्मान्नभवत्यसौनप्रज्ञःतं। असंप्रज्ञातसमाध्यवस्थायाअकर्तारमित्य
र्थः । नाप्रज्ञं चरमदेहमुत्सृज्यमुक्तिंगच्छतांज्ञानाप्रदोनभवतीतिनाप्रज्ञःतं। अदृष्टं मुख्यप्राणानुग्रहाभावेनामुक्तोयस्तेनादृश्यमा
नत्वाददृष्टः तं। अव्यवहार्यं मुक्तिंविनासंसारग्रहणापरपर्यायव्यवहाराद्यविषयत्वादव्यवहार्यःतं । अग्राह्यमित्यर्थः । अलक्षणं
विश्वादित्रयवत्जाग्रदाद्यवस्थाप्रवर्तकत्वरूपानुमापकधर्मशून्यत्वादलक्षणःतं । अचिंत्यं अनुमापकधर्मशून्यत्वादेवानुमितिरूप

उ० । नांतःप्रज्ञंनबहिःप्रज्ञंनोभयतःप्रज्ञंनप्रज्ञानघनंनप्रज्ञंनाप्रज्ञमदृष्टमव्यवहार्यमलक्षणमचिंत्यमव्यपदेश्यमैकात्म्यप्रत्ययसारंप्रपंचोपशमंशिवम
द्वैतंचतुर्थमन्यंते । सआत्मासविज्ञेयः ॥ १ ॥

चिंताविषयोनभवतीत्यचिंत्यः तं । अव्यपदेश्यं व्यवहारस्यव्यवहर्तव्यज्ञानसाध्यत्वादचिंत्यत्वादेवव्यपदेष्टुमशक्यत्वादव्यपदे
श्यः तं । ऐकात्म्यप्रत्ययसारं प्रधानत्वादेकः पूर्णत्वादात्मा । प्रधानंपूर्णंयस्माद्भगवत्स्वरूपं तस्मादेवैकात्म्यं । ज्ञानरूपत्वात्प्रत्य
यः आनंदरूपत्वात्सारः ऐकात्म्यंचासौप्रत्ययश्चासौसारश्चेतितथोक्तः तं । प्रपंचोपशमं गुणादिभिर्विस्तृतत्वात्प्रपंचः उशब्द
(उच्छब्द)वदुपशब्दोप्युत्कृष्टवाची । शमशब्दश्चानंदरूपत्ववाची । तथाचोत्कृष्टानंदरूपत्वादुपशमः प्रपंचश्चावुपशमश्चप्रपं
चोपशमः तं । यद्वाप्रपंचस्यदेहसंबंधरूपस्यउपशमोनाशोयस्माद्भवत्यसौप्रपंचोपशमः तं । शिवंनिर्दुःखसुखरूपत्वाच्छिवः तं ।
अद्वैतं वस्तुस्वरूपापेक्षयाऽन्यथाप्रत्ययोद्वैतं तच्छमयतीत्यद्वैतः तं । अन्यथाप्रत्ययाकारणमित्यर्थः । इदंचविशेषणंप्राज्ञेपिद्रष्टव्यं ।
तादृशंतुरीयं ज्ञानिनश्चतुर्थंमन्यंते । सोयमात्माचतुष्पादित्युक्तमुपसंहरति ॥ सइति ॥ सविश्वादिरूपेणचतुष्पादात्मा आदाना
दिकर्ता सएवसर्वैर्मुमुक्षुभिर्विशेषेणज्ञेयइत्यर्थः ॥ १ ॥ अस्मिन्नप्यर्थेसलिलेश्वरोब्रह्मदृष्टान्मंत्रान्संवादयन्नाह ॥ अत्रैतइति ॥
प्रपंचोपशममितितुरीयस्यसर्वानिष्टनिवृत्तिकारणत्वमुक्तं । तत्रतावन्मंत्रंपठति ॥ निवृत्तेरिति ॥ अव्ययस्तुरीयः सर्वदुःखा
नांनिवृत्तेः प्रभुः समर्थः कारणभूतः मोक्षदत्वात् । ईशानांमुक्तानामनश्श्रेष्टकईशानः । अद्वैतमित्युक्तार्थेमंत्रंपठति ॥ अद्वैतइ
ति ॥ विभुस्तुरीयः । सर्वभावानां भवंतिदेहयोगेनोत्पद्यंतइतिभावाजीवाः तेषां कर्तरिषष्ठी । तैः मुक्तिंगमिष्यद्भिर्देवोगम्यः
स्मृतः । मंत्रेऽधिकमेतत् ॥ २ ॥ नांतःप्रज्ञंनबहिःप्रज्ञंनोभयतःप्रज्ञंनप्रज्ञानघनमितितुरीयस्ययद्विश्वादिभ्यस्त्रिभ्योवैधर्म्यमुक्तं

उप० । अत्रैतेश्लोकाभवंति । निवृत्तेस्सर्वदुःखानामीशानःप्रभुरव्ययः । अद्वैतस्सर्वभावानांदेवस्तुर्योविभुःस्मृतः ॥ २ ॥

तत्रमंत्रंपठति॥ कार्येति॥ अत्रविश्वादीनांबद्धत्वोक्तिरन्यगतबंधस्यतदधीनत्वात्तदधीनत्वादर्थवदितिन्यायेनवा बंधयतीतिबद्धइतिकर्तृव्युत्पत्त्यावेतिज्ञातव्यं । नतुबद्धत्वं । सर्वमानविरुद्धत्वात् । कार्यंभ्रमः कारणमविद्या विश्वतैजसौकार्यकारणरूपद्विविधबंधवंतौ प्राज्ञःकारणरूपैकबंधवान् कार्यकारणाकारेणद्वावपिबंधौतुरीयेनस्तइत्यर्थः । ननुविश्वतैजसयोर्द्विविधबंधवत्त्वे नप्राज्ञतुरीयाभ्यांभेदेपिपरस्परंव्यावर्तकधर्माभावेनकथंभेदइतिचेत् उच्यते । अविद्यारूपकारणबद्धत्वस्योभयत्राविशिष्टत्वेपिकार्यबद्धत्वेवैलक्षण्यसद्भावात् । तथाहि । अविद्या तत्कार्यस्वातंत्र्यादिविषयकजाग्रत्कालीनभ्रमरूपोभयबंधप्रदोविश्वः । अविद्यातत्कार्यजाग्रत्कालीनभ्रमकार्यस्वाप्नभ्रमरूपोभयबंधप्रदस्तैजसः । नचस्वप्नस्यजाग्रत्कालीनभ्रमकार्यत्वंकथमितिशंक्यं । अदृष्टेचाश्रुतेभावेनभावउपजायतइतिवचनेनसंस्कारद्वारातत्कारणकत्वस्यसत्त्वात् । मूलाविद्यारूपकारणमात्रबंधप्रदःप्राज्ञइतितत्वप्रकाशिकाभावबोधयोरुक्तरीत्यावगंतव्यं । द्वौतुतुर्येनसिध्यतइत्यनेनतुरीयस्यसर्वथाऽबंधकत्वमुक्तं । तेनार्थात्सर्वज्ञानप्रदत्वंतस्येतिसूचितंभवति । तथाचनाप्रज्ञमित्युक्तार्थेप्ययंमंत्रःप्रमाणमितिज्ञातव्यं ॥ ३ ॥ नप्रज्ञानघनमित्युक्तेप्राज्ञाद्वैधर्म्येमंत्रांतरंपठति ॥ नेति ॥ प्राज्ञः आत्मानंस्वस्वरूपं परान्जीवाज्ञानसुप्त्यवस्थाकालसुखेभ्योऽन्यान्पदार्थान्सत्यानृतशब्दलक्षितंतत्कार्यंपुण्यंपापंच नसंवेत्ति । णिजंतमेतत् नसंवेदयतीत्यर्थः । इतरेषामसंवेदनरूपक्रियाप्रदानेप्राज्ञस्यैवस्वतंत्रत्वात् । नसंवेत्तीतिश्रुतौउक्तं

उप० । कार्यकारणबद्धौताविष्येतेविश्वतैजसौ । प्राज्ञःकारणबद्धस्तुद्वौतुतुर्येनसिद्धयतः ॥ ३ ॥ नात्मानंनपरांश्चैवनसत्यंनापिचानृतं । प्राज्ञःकिंचनसंवेत्तितुर्यंतत्सर्वदृक्सदा ॥ ४ ॥

स्वतंत्रेकर्तृशब्दःस्यादितिवचनादित्यवगंतव्यं ॥ तुर्यमिति ॥ सर्वदृगित्येतदपिणिजंतं । तथाचतुरीयंरूपं आत्मानं परान् ज्ञानोत्तरकृतपुण्यंचैतत्सर्वंमुक्तौदर्शयतीति सर्वदृगित्यर्थः । अनेनेनाप्रज्ञमित्युक्तंसर्वज्ञानप्रदत्वंचप्रमापितंभवतीतिज्ञातव्यं॥४॥ शिवमद्वैतमितितुरीयस्योक्तमद्वैतमितिविशेषणंसुषुप्तस्थानइत्यादौप्राज्ञस्वरूपकथनपरेवाक्येप्राज्ञस्याप्यभिप्रेतं । अतःप्राज्ञतुरीययोरद्वैतत्वंसमानमित्यत्रमंत्रंपठति ॥ द्वैतस्येति ॥ प्राज्ञतुरीययोरुभयोर्देहादिविषयस्वातंत्र्यभ्रमरूपद्वैतग्रहणाकारणत्वंतुल्यमित्यर्थः । प्राज्ञंतुरीयंचप्राप्तानांदेहादिविषयस्वातंत्र्यभ्रमोनभवतीतितदकारणत्वमुभयोरपीतिभावः । नात्मानमित्यादिनाप्राज्ञतुरीययोर्वैधर्म्यमुक्त्वाद्वैतस्येतिसाम्यंचोक्त्वापुनर्वैधर्म्यंप्रकारांतरेणाह ॥ बीजेति ॥ मूलाविद्यायुतःप्राज्ञः तस्यास्तदधीनत्वेनप्राज्ञस्यतत्प्रवर्तकत्वात्तद्युक्तत्वंयुक्तं । भृत्ययुतःस्वामीत्यादाविवेतिद्रष्टव्यं । साचमूलाविद्या तुरीयेनविद्यते । तत्प्रवर्तकोनभवतीत्यर्थः ॥ ५ ॥ विश्वतैजसयोर्द्विविधबंधवत्त्वेनसाम्यं प्राज्ञस्यैकबंधवत्त्वेनताभ्यांवैलक्षण्यं सर्वथाबंधशून्यत्वेनतुरीयस्यत्रिभ्यो वैधर्म्यं कार्यकारणबद्धावित्यनेनोक्तं तत्रैवमंत्रांतरंपठति ॥ स्वप्नेति ॥ स्वप्नः कार्यरूपोभ्रमः । निद्रा अविद्या । आद्यौ विश्वतैजसौ स्वप्ननिद्रायुतौ । उक्तरीत्याकार्यकारणबद्धावित्यर्थः । प्राज्ञस्त्वस्वप्ननिद्रया स्वप्नशब्दोक्तकार्यभ्रमंविनानिद्रयाअविद्यया युतः । कारणमात्रबद्धइत्यर्थः । निश्चिताः यथार्थनिश्चयवंतः । तुरीयेनिद्रांस्वप्नंचनैवपश्यंति सर्वथाकार्यकारणबंधशून्यत्वेनैवतंप

उप० । द्वैतस्याग्रहणंतुल्यमुभयोःप्राज्ञतुर्ययोः । बीजनिद्रायुतःप्राज्ञःसाचतुर्येनविद्यते ॥ ५ ॥ स्वप्ननिद्रायुतावाद्यौप्राज्ञस्त्वस्वप्ननिद्रया । ननिद्रां नैवचस्वप्नंतुर्येपश्यंतिनिश्चिताः ॥ ६ ॥

श्यंतीत्यर्थः ॥ ६ ॥ नन्वेतादृशस्यतुरीयस्यप्राप्तिःकदेत्याशंकापरिहारायाह ॥ अन्यथेति ॥ तत्वं स्वतंत्रतत्वंभगवंतं अजानतःपुंसो यानिद्राऽविद्याऽस्ति तयान्यथागृह्णतोहंममेत्यादिजाग्रत्कालीनस्वातंत्र्यभ्रमयुक्तस्य स्वप्नःस्वप्नदर्शित्वभ्रमोभवति । जाग्रदवस्थायांस्वातंत्र्यादिविषयभ्रमजन्यसंस्कारेणजाग्रत्कालीनमिदमितिस्वप्नरूपोभ्रमोभवति । एवंरूपेतयोर्विपर्यासेजाग्रत्स्वप्नभ्रमयोर्विपरिवर्तनेक्षीणेसति पद्यतइतिपदंतुरीयं अश्नुतेप्राप्नोतीत्यर्थः ॥ ७ ॥ नन्वनाद्यविद्याबद्धस्यजाग्रत्स्वप्नभ्रमयोर्विपर्यासक्षयए वकथंस्यादित्यतोयदासद्गुरूपदेशादिनाभगवत्प्रबोधोदयस्तदैवेत्याशयेनाह ॥ अनादीति ॥ अनादेर्विष्णोरनादिभूतयामायया इच्छया तदधीनयाप्रकृत्याच सुप्तःस्वापितोजीवो यदाईश्वरेच्छयैवसद्गुरूपदेशेनप्रबुध्यते प्रबोधमायाति श्रवणादिमान्भवतीति यावत् । तदा अजं जनिरहितं । अनिद्रं अज्ञानरहितं । अस्वप्नं स्वप्नाद्युपलक्षितजाग्रदाद्यवस्थातीतं । अद्वैतं अन्यथाज्ञानशून्यं भगवंतं । बुध्यतेऽपरोक्षतोजानातीत्यर्थः । अनंतरंविपर्यासक्षयोभवतीतिभावः ॥ ८ ॥ नन्वहंममेत्यादिस्वस्वामिभावसंबंधरूपप्रपंचोयदिजीवस्वभावःस्यात् तदाभगवत्प्रसादादपिकथमसौनिवर्तेतेत्याशंकायां सनजीवस्वभावःकिंत्वाभिमानिकोभगवदिच्छाधीनएव अतस्तज्ज्ञानजनितात्तत्प्रसादान्निवृत्त्युपपत्तिरित्याशयेनाह ॥ प्रपंचइति ॥ देहादिनिरूपितःस्वस्वामिभावरूपःप्रपंचोजीवस्याभिमानाद्विद्येतअस्वाभाविकतयाऽभगवद्वशत्वेनचविद्यतइत्यंगीकारोयदिभवेत्तथापिभगवज्ज्ञानान्निवर्तेतैवनात्रसंशयइत्यर्थः । ननु

उप० । अन्यथागृह्णतःस्वप्नोनिद्रातत्वमजानतः । विपर्यासेतयोःक्षीणेतुरीयंपदमश्नुते ॥ ७ ॥ अनादिमाययासुप्तोयदाजीवःप्रबुद्ध्यते । अजमनिद्रमस्वप्नमद्वैतंबुद्ध्यतेतदा ॥ ८ ॥ प्रपंचोयदिविद्येतनिवर्तेतनसंशयः । मायामात्रमिदंद्वैतमद्वैतंपरमार्थतः ॥ ९ ॥

भगवज्ज्ञानादपिकथंतन्निवृत्तिरित्यतोभगवदिच्छाधीनत्वात्तस्यतदिच्छयैवनिवृत्तिर्युक्तेत्याशयेनाह ॥ **मायामात्रमिति** ॥ यत
महद्भिरनन्यथाज्ञातत्वादद्वैतंब्रह्म तदिदंद्वैतं अज्ञैरन्यथाज्ञातं। तच्चान्यथाज्ञानं परमार्थतः तसेःसार्वविभक्तिकत्वात्पंचमीषष्ठ्यर्थे।
परमार्थस्योत्तमार्थस्यपरमेश्वरस्यमायामात्रमिच्छानिर्मितंयस्मात्तस्मात्तदिच्छयैवनिवर्ततइत्यर्थः॥९॥ उपसंहरति॥ **विकल्पइति** ॥
अत्रातइत्युपस्कर्तव्यं। केनचित्कल्पितोयदिविकल्पइत्यन्वयः। तथाचातः केनचिदज्ञानादिनाकारणेनकल्पितत्वादेव। यदि यदि
शब्दस्त्ववस्तुत्वइत्येकादशस्कंधतात्पर्ये। अत्रत्ययदिशब्दस्यावस्तुत्वार्थत्वेनव्याख्यातत्वादवस्तुभूतोविकल्पःशरीरादिनिरूपितः
स्वस्वामिभावसंबंधः। उपदेशात् गुरुकृताद्भगवदुपदेशाच्छ्रवणादिरूपात्तज्ज्ञानादपरोक्षज्ञानद्वारानिवर्ततइत्यर्थः। तदनंतरमानं
दाविर्भावरूपांमुक्तिंचेतीतिसिद्धमितिवाक्यशेषोद्रष्टव्यः। ततआनंदमेत्यसावित्युक्तत्वात्। अत्रलिङादेर्वस्तुस्थितिकथनपरत्वमेवा
भिप्रेतंनप्रसंगार्थत्वमित्यवगंतव्यं। नन्वयमुपसंहारोऽनुपपन्नः। अज्ञानादिकल्पितस्यविकल्पस्यभगवज्ज्ञानान्निवृत्त्यनंतरमानंदावि
र्भावरूपांमुक्तिमेतीत्यस्यार्थस्याप्रामाणिकत्वादित्याशंकापरिहारायाह ॥ **अयंवादइति** ॥ ब्रह्मणिज्ञातेसति। द्वैतंस्वस्वामिभाव
संबंधज्ञानरूपमन्यथाज्ञानं नविद्यतेनिवर्तते। तदनंतरमानंदाविर्भावरूपांमुक्तिमेतीत्ययं सतांवादः सिद्धांतः। अतोनात्राप्रामा
णिकत्वशंकाकार्येतिभावः ॥ १० ॥ **इतिमांडूकखंडार्थेद्वितीयःखंडः** ॥ २ ॥ एवंचतुरोविश्वादीन्निरूप्यतेषामेवचतुर्णांप्रण
वांशाकारोकारमकारनादप्रतिपाद्यत्वरूपंमहिमानंवक्तुमुत्तरखंडद्वयं। तत्राद्यखंडंविश्वादीनांत्रयाणांप्रणवांशाकारादित्रयप्रतिपा

उप०। विकल्पोविनिवर्तेतकल्पितोयदिकेनचित्। उपदेशादयंवादोज्ञातेद्वैतंनविद्यतइति ॥ १० ॥

द्यत्वंवक्तुंअनूद्यते ॥ **सोयमात्माध्यक्षरमोंकारइति** ॥ तत्राध्यक्षरपदमन्यथाप्रतीतिनिरासायव्याचष्टे ॥ **अधिकमिति** ॥ अधिकत्वस्यावधिसापेक्षत्वात्सर्वतइत्युक्तं । यदर्थमुक्तमनूदितंतत्प्रस्तावयितुंप्रवृत्तं । अधिमात्रमित्यादि । तत्राधिमात्रशब्दार्थमाह ॥ **अधिकाइति** ॥ पूर्णाइत्यर्थः । अकारइत्यादौअकाराद्यभेदएवोच्यतइत्यन्यथाप्रतीतिनिरासायाह ॥ **अइत्यनेनेति** ॥ आक्रियतेव्यवह्रियते । वैश्वानरोकारःप्रथमामात्राइत्यत्रयथास्थितवाक्यवृत्तावसिद्धस्यानुवादःसिद्धस्यबोधनमित्यापद्यते तच्चायुक्तं । सिद्धंधर्मिणमुद्दिश्यसाध्यधर्मोविधीयतइतिन्यायविरोधापत्तेरतोव्याचष्टे ॥ **तत्रेत्यादिना** ॥ तत्रविश्वादिचतुर्षु पूर्वोक्तः जागरितस्थानइत्युक्तः । इत्याद्यनुवादइत्यत्रत्यादिपदेनस्वप्नस्थानस्तैजसोद्वितीयामात्रेत्यस्यसुषुप्तस्थानःप्राज्ञस्तृतीयामात्रेत्यस्यचसंग्रहः । द्वितीयादिपदेनउकारमकारइत्यस्यग्रहणं । विश्वस्याकारवाच्यत्वेनिमित्तद्वयंकथ्यतेआप्तेरादिमत्त्वाद्वेति ॥ तत्रविश्वस्यादिमत्त्वमप्रतीतेर्व्याचष्टे ॥ **प्राज्ञइत्यादिना** ॥ अस्यविश्वस्य । ननुविश्वंप्रतिप्राज्ञतैजसयोःकथंकारणत्वापरपर्यायरूपमादिमत्त्वमित्यतस्तदुपपादयति ॥ **सुप्तेरित्यादिना** ॥ सुषुप्त्यवस्थापन्नएवजीवस्ताडनादिनाकदाचित्सहसैवजागर्तीत्यनुभवसिद्धं । तदभिप्रायेणसुप्तेरित्याद्युक्तं । स्वप्नंपश्यन्नेवकदाचिज्जागर्तीत्यप्यनुभवसिद्धं । तदभिप्रायेणस्वप्नादीत्यादि । आप्त्यादिमत्त्वाभ्यांनिमित्ताभ्यांअकारवाच्यतयाविश्ववेत्तुःफलप्रतिपादकेआप्नोतीत्यादिवाक्येआदिश्चभवतीत्येतत् उपासकःस्वयमादि

भा० । अधिकंसर्वतअविनाशिचेत्यध्यक्षरं । अधिकाएवमात्राअंशायस्यतदधिमात्रं । अइत्यनेनाभिधानेनाक्रियतइत्यकारः । तत्रपूर्वोक्तोवैश्वानरःप्रथमामात्रेत्याद्यनुवादः । अकारइत्यादिकंविधेयं । प्राज्ञस्तैजसश्चादिरस्येत्यादिमान् । सुप्तेरुत्थानेप्राज्ञाद्विभक्तोभवतिविश्वः । स्वप्नादुत्थानेतैजसात् ।

भवतीत्यन्यथाप्रतीतिनिरासायव्याचष्टे ॥ आदिश्चेति ॥ विश्वइतिवर्तते । मुक्तिकारणमित्यर्थः ॥ १ ॥ तैजसस्यउकारवाच्यत्वेनिमित्तद्वयकथनायोत्कर्षादुभयत्वाद्वेत्येतद्वाक्यंप्रवृत्तं । तत्रतैजसस्योत्कर्षत्वमुभयत्वंचकीदृशमित्यतोविवृणोति ॥ शरीरेति ॥ तैजसोजीवंबाह्यशरीराभिमानादुत्थाप्योद्धृत्यअभिमानंनाशयित्वेतियावत् । स्वप्नस्थानेदेहांतर्वासनामयपदार्थानुभवायकर्षतीत्यर्थः ॥ विषयेति ॥ स्वाप्नविषयेत्यर्थः । प्रवृत्तिनिमित्तद्वयेनउकारवाच्यत्वंतैजसस्यवेत्तुःफलप्रतिपादनायप्रवृत्तं ॥ उत्कर्षतिहेत्यादि ॥ तत्रसमानइत्येतद्व्याचष्टे ॥ समानइति ॥ सर्वेषांमुक्तानां । स्नेहाद्दोषाभावाच्चेतिशेषः । प्राज्ञस्यमकारवाच्यत्वेनिमित्तद्वयकथनायप्रवृत्तेमितेरपीतेर्वेतिवाक्येमितेरित्येतद्व्याचष्टे ॥ मितेरिति ॥ अंतर्गमनात्स्वालिंगनप्रदानेनस्वांतर्जीवस्यगमयितृत्वादित्यर्थः । एवंस्ववाक्येनकानिचिद्वाक्यानिव्याख्यायखंडंब्रह्मतर्कवाक्येनव्याचष्टे ॥ अधिकत्वाच्चेत्यादिना ॥ अधीत्यस्याधिकत्वादिति नित्यत्वादित्यक्षरशब्दस्य येंशाइत्यधिमात्रमित्यस्यव्याख्यानं । मात्राअंशाइत्यनेनपादामात्राइत्येतद्व्याख्यातंभवति । आप्तेरित्येतद्व्याचष्टे ॥ आद्यइति ॥ आद्यःतदंशःतस्योंकारस्यआद्योंशःअकारःसआप्तिःआप्तिवाचीस्यात् । तथासमग्रोंकारवाच्यस्यतस्यभगवतोयआद्योंशःअकारवाच्योविश्वः सोपिजीवस्यविषयानापयेद्यतस्तस्मादाप्तिः । तच्छब्द

भा० । आदिश्चास्योपासकस्यभवति । शरीराभिमानादुत्थाप्यकर्षतीत्युत्कर्षः । निद्राविषयानुभवश्चानेनक्रियतइत्युभयत्वं । समानःसर्वेषांमध्यस्थोभवति । मितेरंतर्गमनात् । अधिकत्वाच्चनित्यत्वादध्यक्षरमुदाहृतः । येंशास्तस्यतुसर्वेपिपूर्णाःप्रत्येकशःप्रभोः । अतोधिमात्रमुद्दिष्टोमात्राअंशाउदाहृताः । श्रुतःसविष्णुरोंकारओमित्याक्रियतेयतः । आद्यस्तदंशोह्याप्तिःस्याद्विषयानापयेद्यतः । जीवस्यतु

वाच्यःस्यादितियोज्यं । आदिमत्वाद्वेत्येतद्व्याचष्टे ॥ यतइति ॥ अविभागोपिस्वतोभेदशून्योपिभगवान्विश्वः । आदिश्चभवतीत्यस्यार्थमाह ॥ तस्मादिति ॥ तज्ज्ञानीविश्वज्ञानीविश्वोपासकःमुक्तउत्पद्यते तस्यतात्पर्यमानंदेति । आनंदस्वरूपःतदुपासनेनानंदाविर्भावरूपामुक्तिर्भवतीतियावत् । आप्नोतिहवैसर्वान्कामानित्येतद्व्याचष्टे॥ आप्नोतीति॥ काम्यंतकामाइतिव्युत्पत्तिमभिप्रेत्यविषयानित्युक्तं । उत्कर्षादुभयत्वाद्वेत्यत्रपदद्वयंव्युत्क्रमेणव्याख्याति ॥ निद्रायाइति॥ मनोव्यतिरिक्तसर्वेंद्रियोपरमरूपायाइत्यर्थः। विषयस्यविषयानुभवस्य इत्युभयोः। कर्षतिजीवंतैजसः । स्वप्नमंडलेस्वप्नस्थाने देहांतरित्यर्थः। वासनामयपदार्थानुभवायेतिशेषः। यतःकर्षतिततः। उत्कर्षतिहवैज्ञावसंततिमित्यस्यार्थमाह ॥ तज्ज्ञानीति ॥ स्वात्मानंदेहादुत्कृष्यस्थितःतैजसज्ञानीमुक्तौज्ञाननित्यतांप्राप्नोतीतियोज्यं । समानश्चभवतीत्येतद्व्याचष्टे॥ सर्वमोक्षिणामिति॥ अत्रापिदेहादुत्कृष्यमोचयित्वास्थितोयंमुक्तःसर्वमोक्षिणांमध्यस्थोभवेत् । अत्रनिमित्तद्वयं॥ स्नेहादित्यादि ॥ तैजसेअस्योपासकस्यस्नेहात्भक्तेःसत्वात्तथोपासकेतस्मिन्तैजसाख्यभगवतःस्नेहात्प्रीतिसद्भावादित्यर्थः । यद्वामुक्तानांपरस्परंस्नेहवत्त्वादित्यर्थः। दोषाभावात्सर्वशःसाकल्येनरागादिदोषाभावादित्यर्थः । यथोक्तं । अक्षरधियांत्वविरोधःसामान्यतद्भावाभ्यामौपसदवत्तदुक्तमिति ॥ २ ॥ मितेरित्ये

भा० । यतःप्राज्ञात्तैजसाद्वासमुत्थितः । अविभागोपिभगवानादिमांस्तेनकीर्तितः । तस्मादुत्पद्यतेमुक्तःसज्ज्ञानानंदलक्षणः । आप्नोतिविषयान्सर्वान्निद्रायाविषयस्यच । उभयोःकारणत्वेनह्युभयस्तैजसःस्मृतः । देहाभिमानादुद्धृत्यकर्षतिस्वप्नमंडले । उत्कर्षत्वंततस्तस्यतज्ज्ञानीज्ञाननित्यतां । आप्नोतिदेहादुत्कृष्यस्वात्मानं सर्वमोक्षिणां । मध्यस्थःसभवेत्स्नेहाद्दोषाभावाच्चसर्वशः ।

तद्व्याचष्टे ॥ **स्वात्मनीत्यादिना** ॥ सर्वशइत्यस्यात्रापिसंबंधः । सर्वशःसर्वमज्ञानावृतंजीवमात्मन्यंतर्गमयतीत्यर्थः । मितिश ब्दात्कथमयमर्थोलभ्येतेत्यतआह ॥ **मानमिति** ॥ मितिरित्यर्थः । अंतर्गतंस्वांतर्गतं ॥ **तज्ज्ञानेति** ॥ तस्यजीवस्ययद्बाह्यप दार्थविषयकंज्ञानंतस्यलयकृद्यतोऽतइतिशेषः । मिनोतिहवाइदंसर्वमितिवाक्यंव्याचष्टे ॥ **तज्ज्ञोपीति** ॥ प्राज्ञज्ञानीत्यर्थः । अपीतिश्चभवतीत्येतद्व्याचष्टे ॥ **दुःखाद्यंत्विति** ॥ ननुव्याप्त्यांतर्गमयेदित्यनेनविमुक्तिगोजीवःसर्वंजगत्व्याप्त्यास्वांतर्गमये दित्युक्तं तदयुक्तं । जीवस्याणुत्वादित्यतोनात्रस्वरूपतोव्याप्तिर्विवक्षिताकिंतुप्रकाशतएवेत्याह॥ **अणूनामपीति** ॥ तथाचसर्वं जगत्प्रकाशापरपर्यायज्ञानव्याप्त्यांतर्गमयतीत्यर्थः । ज्ञानेनसर्वंविषयीकरोतीतियावत् । व्याप्त्यांतर्गमयेत्सर्वमित्युक्त्याब्रह्मांडा द्बहिरपिविद्यमानसर्वपदार्थविषयकज्ञानप्रसक्तौसत्यांसर्वशब्दः संकुचितवृत्तिरित्याशयेनाह ॥ **अंडमात्रइति** ॥ देवेतरेषामि त्यर्थः । बहिःअंडात् । अंडमात्रेप्रकाशोव्यापकोभवेद्यतोऽतोमुक्तौ जीवेषुजीवज्ञानेषु ॥ जगतोंतर्गमनमितिमिनोहवाइदंसर्वमि ति वाक्योक्तमुपपन्नंभवेदित्यर्थः ॥ ३ ॥ अत्रापिसलिलेश्वरःस्वोक्तार्थेसंवादितयाब्रह्मदृष्टान्मंत्रानुदाहरति ॥ **अत्रैतइत्यादि ना** ॥ तत्रमात्रासंप्रतिपत्ताविस्यस्याप्रतीतेरर्थमाह ॥ **मात्रासंप्रतिपत्तावंशध्यानइति** ॥ आदिसामान्यमुत्कटमित्येतदप्रतीते

भा० । स्वात्मन्यंतर्गमयतिमानमंतर्गतिःस्मृता । जीवमंतर्गतंकृत्वातज्ज्ञानलयकृद्यतः । प्राज्ञोमानमपीतिश्चतज्ज्ञोप्येवंविमुक्तिगः । व्याप्त्यांतर्ग मयेत्सर्वंदुःखाद्यंतुविलापयेत् । अणूनामपिजीवानांप्रकाशोव्यापकोभवेत् । अंडमात्रेबहिश्चापिदेवतानांयथाक्रमं । अतोंतर्गमनंमुक्तौजीवेषुजगतोभ वेदितिब्रह्मतर्के । मात्रासंप्रतिपत्तौअंशध्याने ।

र्व्याकरोति॥ आदिमत्त्वमिति॥ सुप्तेरुत्थानेप्राज्ञरूपादिमत्त्वंस्वप्नादुत्थानेतैजसरूपादिमत्त्वंविश्वस्यास्ति। त दादिमत्त्वं। उपासकस्य विश्वोपासकस्यापिभवतीतिमुक्त्यर्थंविश्वरूपादिमत्त्वमस्तीत्येवमादिसामान्यं । आदिमत्त्वेनविश्वतदुपासकयोःसाम्यंशब्दतोद्रष्टव्यमित्यर्थः ॥४॥ नामात्रइतिवाक्यं अमात्रेगतिर्नविद्यतेइत्यन्यथाप्रतीतिवारणायाकारप्रश्लेषेणपदच्छेदंदर्शयन्व्याख्याति ॥ अमात्रेपीति ॥ कर्मणिक्तिन्। भावप्रधानश्चनिर्देशः । तथाचयथाविश्वादिरूपत्रयेऽगतिरगम्यतानविद्यते। तथाऽमात्रेतुरीयेप्यगतिर्नविद्यते। सोपिज्ञानिप्राप्यएवेत्यर्थः। तुरीयस्यकथममात्रत्वमित्यतआह ॥ प्रतिदिवसमिति ॥ तदितिसामान्येनविभागैकीभावयोःपरामर्शः । यथाविश्वादीनांमध्येविश्वतैजसयोःप्राज्ञेनैकीभावविभागौविद्येते यथाविश्वस्यप्राज्ञतैजसाभ्यां। तथातुरीयस्यतौनस्तइत्यमात्रउच्यतइत्यर्थः। अस्त्वेवं नामात्रइतिवाक्यव्याख्यानं। तथापिकिमर्थमेतद्वाक्यंप्रवृत्तमित्यतस्तदवतारयति ॥ विश्वादीनामित्यादिना ॥ व्यवहारःप्रवृत्तिः ॥ इत्यतइति ॥ इत्येतस्माद्धेतोरित्यर्थः। तथाचविश्वादीनांजाग्रदादिप्रवृत्तिरूपव्यवहारकारणत्वंविद्यते। ततएतत्प्रयुक्तंतत्तदवस्थायांजीवेनसाम्यंचास्ति। तुरीयस्यतुगम्यत्वप्रयोजकस्यजाग्रदादिप्रवृत्तिरूपव्यवहारकारणस्याभावात्तत्प्रयुक्तंगम्यत्वमपिनास्तीत्याशंकांअनेनवाक्येननिवर्तयतीत्यर्थः ॥

भा०। मात्रासंप्रतिपत्तौ अंशध्याने। आदिमत्वंविश्वस्यविद्यते। तत् उपासकस्यापिभवतीत्यादिसामान्यं। अमात्रेप्यगतिर्नविद्यते। प्रतिदिवसंविभागएकीभावश्चविद्यतेविश्वादीनां। तुरीयस्यतन्नविद्यतइत्यमात्रः। विश्वादीनांव्यवहारकारणत्वंविद्यते तुरीयस्यतन्नविद्यतइत्यतोगम्यत्वमपिनास्तीत्याशंकांनिवारयति

अगतिर्नविद्यतइतीति ॥ तथाचजाग्रदादिप्रवृत्तेरकर्तापितुरीयोगम्यइत्यंगीकारान्नतस्यागम्यत्वप्रयोजकत्वमितिभावः ॥ ननु भवेदेतद्वाक्यस्योक्तरीत्याऽकारप्रश्लेषेणव्याख्यानंतुरीयस्यागम्यत्वशंकानिवर्तकंयद्यकारोनयतेविश्वमित्यादिवत्तुरीयस्यापिग म्यत्वप्रतिपादकंनिरवकाशंकिंचिद्वाक्यंस्यात्तदेवनास्तीतिचेत्तत्राह ॥ **आत्मानमिति** ॥ गतिवचनात्गम्यत्ववचनादित्यर्थः। तथाचात्मानंसंविशतीतितुरीयप्रकरणेआत्मशब्दोक्तस्यतुरीयस्यसंविशतीतिस्पष्टंगम्यत्वोक्तेः । तदनुसारेणेदमपिवाक्यमकारप्र श्लेषेणव्याख्यातंसदुक्तशंकानिवर्तकंभविष्यत्येवेतिभावः । त्रिषुधामस्वितिवाक्यंप्रमाणेनैवव्याचष्टे ॥ **आदिमत्वेनेति** ॥ उपासकस्यादिमत्वेननिमित्तेनाकारादिवाच्यतयाविश्वाद्युपासकस्योपास्येनविश्वादिनाऽऽदिमत्त्वेनसामान्यंभवेदितिसंजानन्पु मान्सर्ववंद्योभवेदित्यर्थः। सामान्यंतुल्यमित्यन्यथाप्रतीतिवारणायप्रमाणेनैवविवृणोति ॥ **सामान्यत्रयमपीति** ॥ आप्नोति हवैसर्वान्कामानादिश्चभवतीत्यनेनोक्तंआदिसामान्यमाप्तिसामान्यमित्येकं । उत्कर्षतिहवैज्ञानसंततिंसमानश्चभवतीतिवाक्येनो क्तंउत्कर्षसामान्यमुभयसामान्यमित्यपरं। मिनोतिहवाइदंसर्वमपीतिश्चभवतीत्यनेनोक्तंमानसामान्यलयसामान्यमित्यन्यदित्येवं सामान्यत्रयमपितुल्यंएकप्रकारतयाऽविकारीत्यर्थः। कुतइत्यतउक्तं ॥ **मुक्तिगतत्वतइति** ॥ नहिमुक्तिगतंविकारीतिभावः। प्रतिदिवसमेकीभावविभागयोरभावात्तुरीयोऽमात्रोज्ञानगम्यश्चेत्येतत्प्रमाणशेषेणद्रढयति ॥ **अमात्रत्वमिति** ॥ जाग्रदादिप्र

भा० । अगतिर्नविद्यतइति । आत्मानंसंविशतीतिगतिवचनात् । आदिमत्वेनसामान्यमुपास्येन भवेदिति । उपासकस्यसंजानन्सर्ववंद्योभवे त्पुमान् । सामान्यत्रयमप्येतत्तुल्यंमुक्तिगतत्वतः । अमात्रत्वंतुरीयस्यत्वविभागादिनेदिने ।

वृत्तिकारणत्वंगम्यत्वप्रयोजकंनभवतीत्येतदपिप्रमापयति ॥ **जाग्रदादेरिति** ॥ आदिमत्त्वादिसामान्यंमुक्तिगतत्वतस्तुल्यमि त्यत्र तुरीयस्योक्तरीत्याऽमात्रत्वेचप्रमाणांतरंपठति ॥ **आदिमत्त्वादीति** ॥ **मोक्षोपभोग्यतइति** ॥ मोक्षोपभोग्यत्वतः मोक्षपर्यवसायित्वादितियावदित्यर्थः ॥ ८ ॥ **इतिमांडूकभाष्यार्थेतृतीयःखंडः** ॥ ३ ॥ **ततश्चायंखंडार्थः** ॥ एवंचतुरो विश्वादीन्निरूप्यतेषामेवचतुर्णांप्रणवांशाकारोकारमकारनादप्रतिपाद्यत्वरूपमहिमानमाहोत्तरखंडद्वयेन । तत्रादौविश्वादीनांत्र याणांप्रणवांशाकारोकारमकारत्रयप्रतिपाद्यत्वंवक्तुंउक्तमनुवदति ॥ **सोयमात्मेति** ॥ सोयंविश्वादिचतूरूपआत्मा अध्यक्षरं सर्वतोधिकत्वादधि अविनाशित्वादक्षर मोमित्याक्रियतइत्योंकारः। यद्वक्तुमुक्तमनूदितंतन्निरूपयितुंप्रस्तावयति ॥ **अधिमा त्रमिति** ॥ अधिअधिकाःपूर्णाःमात्रायस्यासावधिमात्रः । कास्तामात्राइत्यतआह ॥ **पादामात्राइति** ॥ पादाःअंशाःमात्रा मात्राशब्दवाच्याइत्यर्थः। तेपादाअपिकइत्यतआह ॥ **अकारइत्यादिना** ॥ अत्रनादोपिग्राह्यः । तत्राकारवाच्यःकइत्यत आह ॥ **जागरितेति** ॥ योजागरितस्थानोवैश्वानरोभगवतःप्रथमामात्राप्रथमोंशोविश्वःसअकारःअकारवाच्यः। विश्वेअका

भा० । जाग्रदादेरकर्तापिगम्योसौज्ञानिनांभवेदितिच । आदिमत्त्वादिसामान्यंतुल्यंमोक्षोपभोग्यतः । अमात्रत्वंतुरीयस्याप्यविभागाद्दिने दिनइत्यात्मसंहितायां ।

उप । सोयमात्माध्यक्षरमोंकारोऽधिमात्रं पादामात्राअकारउकारोमकारइति। जागरितस्थानोवैश्वानरोकारःप्रथमामात्रा। आप्तेरादिमत्त्वाद्वा आप्नोतिहवैसर्वान्कामानादिश्चभवतियएवंवेद ॥ १ ॥

रप्रवृत्तौनिमित्तद्वयमाह ॥ आप्तेरादिमत्त्वाद्वेति ॥ आप्तेर्जीवस्यविषयानापयतिप्रापयतीत्याप्तिस्तन्निमित्तात् । आदिमत्त्वाद्वा सुप्त्यवस्थातोजाग्रदवस्थायांप्रत्यागमनेविश्वस्यप्राज्ञाद्विभज्यमानत्वेनप्राज्ञरूपादिमत्त्वं । स्वप्नादुत्थानेतैजसाद्विभज्यमानत्वेन तैजसरूपादिमत्त्वमस्तीत्येवंआदिमत्त्वाद्वा अइत्युच्यतइत्यर्थः । आप्त्यादिमत्त्वरूपनिमित्तद्वयेनाकारवाच्यतयाविश्ववेत्तुःफलमाह ॥ आप्नोतीति ॥ यएवंनिमित्तद्वयेनविश्वस्याकारवाच्यत्वंवेद ससर्वान्कामान्काम्यान् विषयान्विश्वानुग्रहेणप्राप्नोतिमुक्तौ ॥ अस्योपासकस्यभगवान्विश्वआदिश्च मुक्तेःकारणंचभवतीत्यर्थः ॥ १ ॥ उकारवाच्यःकइत्यतआह ॥ स्वप्नस्थानइति ॥ यःस्वप्नस्थानस्तैजसोद्वितीयामात्रासउकारःउकारवाच्यइति । तत्रउकारशब्दप्रवृत्तौनिमित्तद्वयमाह ॥ उत्कर्षादुभयत्वाद्वेति ॥ शरीराभिमानादुत्थाप्योद्धृत्यस्वप्नमंडलंप्रतिवासनामयपदार्थानुभवायकर्षतीत्युत्कर्षस्तस्मात् ॥ बाह्यव्यापारोपरतिरूपनिद्रायाःस्वाप्नविषयानुभवस्यचहेतुत्वादुभयत्वं तस्माद्वाउकारवाच्यइत्यर्थः । एवंनिमित्तद्वयेनतैजसस्योकारवाच्यत्ववेत्तुःफलमाह ॥ उत्कर्षतीत्यादिना ॥ एवंनिमित्तद्वयेनतैजसस्योकारवाच्यत्वंयोवेदसज्ञानसंततिमुत्कर्षति ज्ञानसंतत्योत्कृष्टोभवति । मुक्तिंप्राप्यनित्यज्ञानोभवतीतिहवैप्रसिद्धमित्यर्थः । समानश्चभवतिस्नेहाद्दोषाभावाच्चसर्वमुक्तानांमध्यस्थोभवति । अस्यैवंउकारवाच्यतयातैजसवेत्तुःकुलेऽब्रह्मवित्पुत्रो नभवति ज्ञानिपुत्रकोभवतीत्यर्थः ॥ २ ॥

उप० । स्वप्नस्थानस्तैजसउकारोद्वितीयामात्रा । उत्कर्षादुभयत्वाद्वा । उत्कर्षतिहवैज्ञानसंततिंसमानश्चभवतिनास्याब्रह्मवित्कुलेभवतियएवंवेद ॥२॥

मकारवाच्यः कइत्यतआह ॥ **सुषुप्तस्थानइति** ॥ यःसुषुप्तस्थानःप्राज्ञोभगवतस्तृतीयामात्रा समकारो मकारवाच्यइति । प्राज्ञे मकारप्रवृत्तौनिमित्तद्वयमाह ॥ **मितेरपीतेर्वेति** ॥ मितिरंतर्गतिः । तथाचसुप्तौजीवमात्मन्यंतर्गमयतीतिहेतोः । तथाऽपीतेः सुप्तौबाह्यज्ञानलयकर्तृत्वाद्वा मकारवाच्यइत्यर्थः । मानंज्ञानंलयश्चैवमर्यादाचापिकथ्यतइतिवचनात् । एवंनिमित्तद्वयेनप्राज्ञस्य मकारवाच्यत्ववेत्तुःफलमाह ॥ **मिनोतिहवाइत्यादिना** ॥ एवंनिमित्तद्वयेनप्राज्ञस्यमकारवाच्यत्वंयोवेदसइदंसर्वंजगन्मिनोति । अत्यणूनामपिजीवानांप्रकाशतोव्याप्तेःसत्त्वात्प्रकाशस्यांतर्गमयति । अंडमात्रस्थितंपदार्थजातंजानातीतियावत् । अपीतिर्दुःखादेःसंसारस्यविलापकश्चभवतीत्यर्थः ॥ ३ ॥ जागरितस्थानइत्यादिनोक्तार्थेविश्वासजननायसलिलेश्वरोब्रह्मदृष्टान्मंत्रान्संवादयन्नाह ॥ **अत्रैतइति** ॥ तत्रजागरितस्थानइत्याद्यर्थेमंत्रंपठति ॥ **विश्वस्येति** ॥ विश्वअकारवाच्यइत्येवंविश्वस्यअत्वविवक्षांउक्तरीत्याअकारवाच्यत्वविवक्षांकृत्वेतियावत् । मात्रासंप्रतिपत्तौ मात्रायाःविश्वलक्षणभगवदंशस्यसंप्रतिपत्तौध्यानेक्रियमाणेसति । अस्यध्यातुरुत्कटंविस्पष्टंयथाभवतितथाऽऽदिसामान्यं उक्तरीत्याविश्वस्यप्राज्ञतैजसरूपादिमत्त्वंविद्यते । तदुपासकस्यापिभवतीत्येवमादिमत्त्वेनसाम्यंभवति । शब्दसाम्यमेवात्रद्रष्टव्यं। तथाऽऽप्तिसामान्यं । उक्तरीत्याऽप्तिमत्त्वेनापिसाम्यंस्यात्भवतीत्यर्थः ॥ ४ ॥ स्वप्नस्थानइत्याद्यर्थेमंत्रंपठति ॥ **तैजसस्येति** ॥ तैजसस्योकारवाच्यत्वविज्ञानेउक्तरीत्याउकारवाच्यत्ववि

उप० । सुषुप्तस्थानःप्राज्ञोमकारस्तृतीयामात्रा । मितेरपीतेर्वा । मिनोतिहवाइदंसर्वमपीतिश्चभवतियएवंवेद ॥ ३ ॥ अत्रैतेश्लोकाभवंति । विश्वस्यात्वविवक्षायामादिसामान्यमुत्कटं । मात्रासंप्रतिपत्तौस्यादाप्तिसामान्यमेवच ॥ ४ ॥ तैजसस्योत्वविज्ञानेउत्कर्षोदृश्यतेस्फुटं । मात्रासंप्रतिपत्तौ

वक्षांकृत्वामात्रासंप्रतिपत्तौ तैजसलक्षणभगवदंशध्याने अस्योपासकस्यस्फुटमुत्कर्षःज्ञानोत्कर्षरूपंफलंविद्यते । तथाविधं भगवन्निष्ठोभयत्वसदृशं उभयत्वंचविद्यते । निद्रास्वाप्नविषयानुभवश्चभगवताक्रियतइतितस्योभयत्वं । अस्याप्युपासकस्यबाह्येंद्रियोपरमरूपानिद्रामुक्तौभवति । बाह्येंद्रियाणिजडानिसर्वाण्यपिनश्यंतीतियावत् । स्वरूपेंद्रियेणविषयानुभवश्चभवतीत्युभयत्वंविद्यतेभवतीत्यर्थः ॥ ५ ॥ सुषुप्तस्थानइत्याद्यर्थेमंत्रंपठति ॥ **मकारेति** ॥ प्राज्ञस्यमकारभावे मकारवाच्यत्वे उक्तरीत्यामकारवाच्यत्वविवक्षांकृत्वामात्रासंप्रतिपत्तौ प्राज्ञरूपभगवदंशध्याने ऽस्योत्कटंमानसामान्यं उक्तरीत्यास्वांतर्गमयितृत्वेनसाम्यं उक्तरीत्यालयकर्तृत्वेनसाम्यंचभवतीत्यर्थः ॥६॥ यत् अकाराद्यभिधेयविश्वाद्युपासकानांसर्वकामावाप्त्यादिफलमुक्तं तत्सत्यमेव । कुतइति चेत् अकाराद्यभिधेयविश्वाद्युपासकाःसर्वकामाप्त्यादिमंतइतिवेऽत्तुरपिफलोक्तेः । नहितस्यमिथ्यात्वेतद्वेत्तुःफलंभविष्यतीत्याशयेनाह ॥ **त्रिष्विति** ॥ योनिश्चितोनिश्चयरूपज्ञानवानधिकारी । त्रिषुधामसुतेजःस्वरूपंचगृहंप्राज्ञैर्धामेतिगीयतइतिवचनात् विश्वादिस्वरूपेषुअकारादिवाच्यतयोपासकेनोपासितेषुसत्सूपजायमानंयदुपासकस्योपास्येनआप्त्यादिमत्त्वरूपंसामान्यंसाम्यंतत्तुल्यंमोक्षपर्यवसायित्वादविकारीतिवेत्ति । ससर्वभावानां कर्तरिषष्ठी । सर्वभावैःसर्वजीवैः पूज्योवंद्यश्चभवति । महामुनिश्चभवतीत्यर्थः ॥ ७ ॥ विश्वाद्युपासकानांसर्वकामावाप्त्यादि फलमित्युक्तं । तत्प्राप्तिरूपफलांतरंचास्तीत्याह ॥ **अकारइत्या**

उप० । स्यादुभयत्वंतथाविधं ॥५॥ मकारभावेप्राज्ञस्यमानसामान्यमुत्कटं । मात्रासंप्रतिपत्तौतुलयसामान्यमेवच ॥६॥ त्रिषुधामसुयत्तुल्यंसामान्यंवेत्तिनिश्चितं । सपूज्यस्सर्वभावानांवंद्यश्चैवमहामुनिः ॥ ७ ॥ अकारोनयतेविश्वमुकारश्चापितैजसं । मकारश्चपुनःप्राज्ञंनामात्रेविद्यतेऽगतिः ॥ ८ ॥

दिना ॥ अकारःअकारवाच्योविश्वःतथाध्यातः विश्वंस्वंप्रति उपासकंनयतीत्यर्थः । एवमुत्तरत्रापिव्याख्येयं । विश्वादीनांजाग्रदादिप्रवर्तकत्वेनतत्तदवस्थायांजीवेनगम्यत्ववत्तुरीयस्यतदभावात् तत्प्रयुक्तंगम्यत्वमपिनास्तीत्याशंकांपरिहरति ॥ **नामात्रइति** ॥ विश्वादिवत्प्रत्यहमेकीभावविभागयोरभावेनामात्रोयस्तुरीयस्तस्मिन्नगतिःकर्मणिक्तिन् भावप्रधानश्चनिर्देशः अगम्यतानास्तीति सोपिज्ञानिप्राप्यएव । आत्मानंसंविशतीतितस्यापिगम्यत्ववचनादित्यर्थः । तथाचनजाग्रदादिप्रवृत्तिकारणत्वंगम्यत्वेप्रयोजकमितिभावः ॥ ८ ॥ **मांडूकखंडार्थेतृतीयःखंडः** ॥ ३ ॥ तुरीयस्यनादप्रतिपाद्यत्वंवक्तुमयंखंडःप्रवृत्तः । तत्रनादप्रतिपाद्यत्वेन तुरीयज्ञानिफलप्रतिपादकं आत्मैवेत्यादिवाक्यं अभेदप्रतीतिनिरासायसम्यग्व्याचष्टे ॥ **आत्मैवेत्यादिना** ॥ पारतंत्र्यादिविशिष्टस्वरूपानुभवमपरित्यज्येत्यर्थः । एवकारलब्धार्थंदर्शयति ॥ **अन्याभिमानमिति** ॥ देहाद्यभिमानमित्यर्थः । आत्मनेत्यस्यार्थःपरमात्मनैवेति । प्रसन्नेनतुरीयेणेत्यर्थः । तत्प्रसादादितियावत् परमात्मानंतुरीयं । नन्वदृष्टमव्यवहार्यमित्यादिनापूर्वंतुरीयस्याव्यवहार्यत्वादेःप्रतिपादनादत्रपुनरव्यवहार्यत्वादिकंतुरीयस्यकस्मादुच्यतइत्यतस्तदभिप्रायमाह ॥ **अव्यवहार्यत्वादिकमिति** ॥ अत्रतुरीयोपासके । विश्वाद्युपासकेतत्साम्यस्येवतुरीयोपासकेपितत्साम्यस्यावश्यंवक्तव्यत्वादव्यवहार्यत्वादिधर्मेणतत्साम्यमितिदर्शयितुंपुनरत्राव्यवहार्यत्वादिकमुक्तमित्यर्थः । अद्वैतओंकारइत्यत्रतुरीयस्यसमग्रोंकारप्रतिपाद्यत्वमुच्य

भा० । आत्मैवभूत्वाऽन्याभिमानंत्यक्त्वापरमात्मनैवपरमात्मानंप्रविशत्युपासकः । अव्यवहार्यत्वादिकमत्रसममितिदर्शयितुंपुनरप्युक्तमव्यवहार्यत्वादिकं ।

तइत्यन्यथाप्रतीतिनिरासायप्रमाणेनैवव्याचष्टे ॥ **तुरीयमिति** ॥ तथाचात्रोंकारशब्देनतदवयवोनादोग्राह्यः । नादोनामवर्णोमंत्र
शास्त्रेप्रसिद्धः । तत्सद्दशात्मवानितितुरीयवत्तदुपासकस्यापिलोकव्यवहारागोचरत्वादव्यवहार्यत्वादिधर्मैस्तत्सद्दशत्ववत्ज्ञाना
नंदादिगुणैरपितत्सद्दशत्वंकिन्नस्यादित्यतआह ॥ **ज्ञानानंदाविति** ॥ यद्यपितत्सद्दशात्मवानितिसामान्येनोच्यतेतथापिज्ञानानं
दौशक्तिश्चेत्येतद्धर्माःविमुक्तस्यजीवस्यक्वचिदपिनभगवज्ज्ञानादिसमाइत्यर्थः । कस्मान्नसमाइत्यतआह ॥ **पारतंत्र्यमिति** ॥
परतंत्रत्वादित्यर्थः ॥ १ ॥ अत्रस्वोक्तार्थेसंमतित्वेनसलिलेश्वरोमंत्रानुदाहरति ॥ **अत्रैतइति** ॥ सलिलेश्वरोदाहृतेमंत्रेॐकारं
पादशअवयवशःविद्यादितिवत् युंजीतप्रणवेचेतइत्यादिकंनतुरीयमात्रनिष्ठं । किंतुचतूरूपसाधारणमित्याशयेनतत्प्रमाणेनैवव्या
चष्टे ॥ **चतूरूपस्येति** ॥ प्रणवशब्दवाच्यत्वंकेननिमित्तेनेत्यतआह ॥ **जाग्रदादीति** ॥३॥ प्रणवोहीत्यत्रब्रह्मशब्दार्थमाह ॥
सएवेति ॥ चतूरूपएवेत्यर्थः ॥४॥ ॐकारंमत्वा ॐकारोविदितइत्यत्रोंकारशब्दार्थमाह ॥ **ओमितीति** ॥ आहृयादिमत्त्वनिमि
त्तैःप्रणवांशाकारादिवाच्यत्वंविश्वादीनांप्रतिपादितंतच्छ्रुत्युक्तत्वान्नानादरणीयमित्याह ॥ **आदिमत्वादयइति** ॥ ओमित्यस्यत
दवयवभूताकारादेरादिमत्त्वादयोयेऽर्थाउक्ताःतेश्रुतावपिश्रुताउक्ताइत्यर्थः ॥६॥ अपूर्वादिशब्दचतुष्टयस्यार्थमाह ॥ अपूर्वइत्या

भा० तुरीयंनादनामानंहरिंज्ञात्वापरंपदं । तमेवप्रविशेच्छुद्धरूपीतत्सद्दशात्मवान् । ज्ञानानंदौचशक्तिश्चतथापिनसमाःक्वचित् । विमुक्तस्या
पिजीवस्यपारतंत्र्यंचनित्यदा । चतूरूपस्यास्यविष्णोर्नामप्रणवइत्यपि । जाग्रदादिप्रणयनात् ॥ ३ ॥ सएवब्रह्मबृंहणात् । ओमित्याक्रियमाणत्वा
दोंकारःसप्रकीर्तितः । आदिमत्वादयोह्यर्थाओमित्यस्यश्रुतौश्रुताः । ॥ २८ ॥

दिना ॥ नाशाभावादिति ॥ तथाचनविद्यतेंतरोनाशोयस्येत्यनंतरइत्यर्थउक्तोभवति ॥ **पराधीनेति** ॥ तथाचनविद्यतेऽपरःस्थितिकर्ताऽस्येत्यनपरइत्यर्थोद्रष्टव्यः ॥ **सर्वगत्वादिति** ॥ नविद्यतेन्योजगतोबहिर्यस्मादसावबाह्यः । तत्रहेतुःसर्वगतत्वादिति । अनेनसर्वव्यापिनमितिवक्ष्यमाणंसर्वगतत्वमत्रहेतुतयासंबध्यतइत्युक्तंभवतीतिद्रष्टव्यं ॥ ४ ॥ एवंहिप्रणवंज्ञात्वेत्यादेरर्थःतंज्ञात्वेति ॥ विप्रमुच्यतेविशेषेणमुच्यतइत्यर्थः ॥ ५ ॥ प्रणवोह्यपरमित्यादौवासुदेवाद्यवतारविश्वाद्यवताराणांसामर्थ्यभेदतःपरत्वापरत्वेइतिप्रतीतिनिवारणायाह ॥ **परत्वमिति** ॥ तर्हिपरत्वादिशब्दार्थःकःप्रतिपत्तव्यइत्यतआह ॥ **अवतारस्येति** ॥ पश्चिमत्वाच्चेत्यपिग्राह्यं । पूर्वापरयोर्भावःपौर्वापर्यं । पूर्वत्वमपरत्वंचेत्यर्थः । पूर्वत्वंनामपरत्वमित्यवगंतव्यं । एवमन्यथाप्रतीतिंप्रमाणेनैवपरिहृत्यार्थमाह ॥ **पूर्वावतारइति** ॥ वासुदेवाद्यवतारइत्यर्थः । पश्चिमावतारइति विश्वतैजसादिरूपावतारइत्यर्थः ॥ ४ ॥ ततश्चायंखंडार्थः ॥ **मांडूकभाष्येचतुर्थःखंडः** ॥ ४ ॥ तंयथायथोपासतेतदेवभवतीतिवचनेनविश्वाद्युपासकेतत्साम्यस्येवतुरीयोपासकेपितत्साम्यस्यावश्यंवक्तव्यत्वादव्यवहार्यत्वादिधर्मेणतत्साम्यंविवक्षितमित्याशयेननांतःप्रज्ञमित्यादौतुरीयस्ययदव्यवहार्यत्वादिकमुक्तंतदनुवदन्प्रणवांशनादप्रतिपाद्यत्वरूपमहिमानमाह ॥ **अमात्रइत्यादिना** ॥ अव्यवहार्यत्वादिकंप्राग्व्याख्यातं

भा० । पराधीनस्थित्यभावादनपरउदाहृतः । सर्वगत्वादबाह्यश्चतंज्ञात्वाविप्रमुच्यतेइतिच । परत्वमपरत्वंचविष्णोरेकस्यवैयदा । श्रूयतेनतुसामर्थ्यभेदस्तत्रकथंचन । अवतारस्यपूर्वत्वात्पौर्वापर्यमुदाहृतमितिब्रह्मतर्के । पूर्वावतारेपश्चिमावतारेपिपूर्णएवेतिप्रणवोह्यपरंब्रह्मेत्यादेरर्थः ॥ ५ ॥

उप० । अमात्रश्चतुर्थोऽव्यवहार्यःप्रपंचोपशमःशिवोद्वैतओंकारआत्मैवसंविशत्यात्मनात्मानंयएवंवेद ॥ १ ॥

तथाचयोऽव्यवहार्यःप्रपंचोपशमःशिवोद्वैतअमात्रश्चतुर्थस्तुरीयःसओंकारस्तदवयवभूतनादप्रतिपाद्यइत्यर्थः । नादप्रतिपाद्यत्वेन
तुरीयोपासकस्यफलमाह॥ **आत्मेति** ॥ यएवंतुरीयंनादप्रतिपाद्यंवेदसआत्मैवभूत्वादेहाद्यन्याभिमानंत्यक्त्वाऽऽत्मनाप्रसन्नेनपर
मात्मना तुरीयप्रसादादितियावत् । आत्मानंतुरीयंसंप्रविशतीत्यर्थः ॥ १ ॥ नादप्रतिपाद्यतुरीयज्ञानीमुक्तौतमेवसंप्रविशतीति
स्वोक्तार्थेसलिलेश्वरोब्रह्मदृष्टान्मंत्रान्प्रमाणयति॥ **अत्रेति** ॥ तानेवोदाहरति ॥ **ॐकारमिति** ॥ पादशःपादैः । कःपादशब्दा
र्थइत्यतआह ॥ **पादाइति** ॥ मात्राःअंशाः । तथाचोंकारंभगवंतंअकारादिभिःपादैःअंशैःप्रतिपाद्यंविद्यात् । तत्रोंकारंतुरीयं पा
दशःनादरूपांशप्रतिपाद्यत्वेनज्ञात्वा । किंचित्सांसारिकंविषयजातं नचिंतयेत् नचिंतयति । तमेवप्रविश्यानंदाविर्भावमेतीतिभावः
॥२॥ संसारंतितीर्षुणावश्यमोंकारप्रतिपाद्यश्चतूरूपोभगवान्ध्यातव्यइत्यत्रमंत्रंपठति ॥ **युंजीतेति**॥ प्रणवे जाग्रदादिप्रणयनात्प्र
णवशब्दवाच्येचतूरूपेविष्णौ चेतोयुंजीत। प्रणवस्वरूपमेवाह ॥ **प्रणवइति** ॥ ततःकिंफलमित्यतआह ॥ **प्रणवइति** ॥ प्रणव
स्यनिर्भयत्वादेवतत्रनित्यंमनोयोगयुक्तस्यापिभयंनास्तीत्यर्थः । वासुदेवादिभिःपूर्वावतारैःपाश्चात्यावताराणांविश्वादीनांज्ञाना
दिगुणेनअपकर्षोनमंतव्यइत्याह ॥ **प्रणवोह्यपरमिति** ॥ योऽपरंअपरः पाश्चात्यः प्रणवः तत्प्रतिपाद्योविश्वादिचतूरूपोभग
वान् सब्रह्म बृंहणात् । परं परः पूर्वकालीनावतारः वासुदेवादिः सोपिब्रह्मेत्येतद्धि पूर्णमदःपूर्णमिदंपूर्णात्पूर्णमुदच्यतइ

उप० । अत्रैतेश्लोकाभवंति । ओंकारंपादशोविद्यात्पादामात्रानसंशयः । ॐकारंपादशोज्ञात्वानकिंचिदपिचिंतयेत् ॥ २ ॥ युंजीतप्रणवेचेतःप्रण
वोब्रह्मनिर्भयं । प्रणवेनित्ययुक्तस्यनभयंविद्यतेक्वचित् ॥ ३ ॥ प्रणवोह्यपरंब्रह्मप्रणवश्चपरस्मृतः । अपूर्वोनंतरोबाह्योनपरःप्रणवोव्ययः ॥ ४ ॥

त्यादिश्रुतिसिद्धमित्यर्थः । तथाचपूर्वावतारेपश्चिमावतारेपिपूर्णएव । नावतारेषुकश्चिद्गुणापकर्षइत्याशयः । पूर्णत्वसंभावनायपु
नस्तत्स्वरूपंनिरूपयति ॥ **अपूर्वइत्यादिना** ॥ प्रणवःतत्प्रतिपाद्योविश्वादिचतूरूपोभगवान् अपूर्वः । नविद्यतेपूर्वःकारणंय
स्यासौतथोक्तः । अनादिरित्यर्थः । अनंतरःनविद्यतेंऽतरोनाशोयस्यासौतथोक्तः । नविद्यतेऽन्योजगतोंतरःअंतःस्थितःयस्माद
सौतथोक्तइत्यप्यर्थोद्रष्टव्यः । सर्वस्यहृदयेस्थितमितिवक्ष्यमाणत्वात् । अबाह्यःनविद्यतेन्योजगद्बाह्योयस्मादसौतथोक्तः ।
अनपरःनविद्यतेऽपरःस्थितिकर्तायस्येतितथोक्तः । नविद्यतेव्ययोगुणादिनाशोयस्यासौतथोक्तः ॥ ४ ॥ प्रणवप्रतिपाद्यस्यविश्वा
दिचतूरूपस्यभगवतोपूर्वइत्यादिनासृष्ट्यादिकर्ताऽन्योनास्तीत्युक्तं । नकेवलमेतावत् किंतुस्वयमेवसर्वस्योत्पत्त्यादिकर्तेतिवदंस्त
ज्ज्ञानिनःफलंचाह ॥ **सर्वस्येति** ॥ जगतइत्यर्थः । आदिःकारणं मध्यंस्थितिकर्ता अंतःसंहारकः ज्ञात्वेतिक्त्वाप्रत्ययलब्धानं
तर्यस्यैवप्रकटनमनंतरमिति यद्वाऽनंतरं उक्तरीत्यातच्छब्दावाच्यंतत्ब्रह्मव्यश्नुतेअशून्याप्तौ विशेषेणाप्नोतीतिव्याख्येयं ॥ ५ ॥
अनंतरोऽबाह्यइतिपदाभ्यांजगदंतर्बहिश्चतदन्योनास्तीत्युक्तं । नकेवलमेतावत् किंतुस्वयमेवसर्वांतर्बहिश्चेतिवदंस्तज्ज्ञानिनः
फलंचाह ॥ **प्रणवंहीति** ॥ सर्वस्यहृदयेस्थितमित्यनेनाणुत्वमुक्तं । सर्वव्यापिनमितिमहत्त्वंचोक्तं । तयोरविरोधोपपाद
नायेश्वरंहीति । अघटितघटकशक्तिसंपन्नतयाप्रमाणसिद्धमित्यर्थः ॥ ६ ॥ एवंप्रणवप्रतिपाद्यविश्वादिचतूरूपभगवज्ज्ञानिनंस्तुव
न्नुपनिषदंसमापयति ॥ **अमात्रइति**॥ अमात्रोभिन्नांशरहितः अनंतमात्रःपुनरनंतांशः द्वैतस्योपशमोमिथ्याज्ञानस्योपशमकर्तेति

उप० । सर्वस्यप्रणवोह्यादिर्मध्यमंतस्तथैवच। एवंहिप्रणवंज्ञात्वाव्यश्नुतेतदनंतरं ॥५॥ प्रणवंहीश्वरंविद्यात्सर्वस्यहृदयेस्थितं । सर्वव्यापिनमोंकारं
मत्त्वाधीरोनशोचति ॥६॥ अमात्रोनंतमात्रश्चद्वैतस्योपशमःशिवः । ओंकारोविदितोयेनसमुनिर्नेतरोजनः । समुनिर्नेतरोजनइति ॥७॥ मांडू. सं.॥

तत्वप्रकाशिकोक्तरीत्याव्याख्येयं । निर्दुःखसुखरूपत्वाच्छिवः । ओमित्याक्रियमाणत्वादोंकारोविश्वादिचतूरूपोहरिः । येनअधिकारिणाविदितःसम्यक्श्रवणादिनाज्ञातः सएवमुनिरपरोक्षज्ञानीभवति । इतरोजनस्तुनमुनिरित्यर्थः । उपनिषदर्थस्यसर्वस्यावधारणार्थमंतेद्विरुक्तिः । अध्यायांतेद्विरुक्तिःस्याद्वेदवावैदिकेपिवा ॥ विचारोयत्रसज्येतपूर्वोक्तस्यावधारणइतिभगवत्पादैरभिहितत्वादित्यवगंतव्यं ॥ ७ ॥ **मांडूकखंडार्थेचतुर्थःखंडः ॥ ४ ॥** एवंसमापितभाष्योभगवानाचार्योंतेपिएतदुपनिषत्प्रतिपाद्यंविश्वादिचतूरूपंविष्णुंप्रणमति ॥ **एकोपीति** ॥ ऐक्येपींद्रार्जुनादिवद्विशेषोनमंतव्यइत्याशयेननिर्विशेषोपीत्युक्तं । चतुर्धाव्यवहारभाक् विश्वादिरूपेणेतिशेषः । एकस्यापिचतुर्धाव्यवहारभाक्त्वमभेदेभेदकार्यकारिणाविशेषेणोपपन्नमित्याशयः । विश्वादिचतद्रूपंचविश्वादिरूपं तदस्यास्तीतिविश्वादिरूपी तमितिकर्मधारयादिनिः । तेनबहुव्रीहिणैवमत्त्वर्थलाभादिनेर्वैयर्थ्यमितिशंकानवकाशइतिध्येयं । चिदानंदंज्ञानानंदादिस्वरूपं । इदंचप्रत्ययसारंप्रपंचोपशममित्यनेनोक्तमित्यवगंतव्यं । विष्णुंवंदेअभिवादयामिस्तौमिचेत्यशेषमतिमंगलं ॥ मांडूकोपनिषद्भाष्यंविवृतंगुर्वनुग्रहात् ॥ तेनेष्टदोस्तुमत्पूज्योभगवान्बादरायणः ॥ यैरहंशुकवत्सम्यक्शिक्षितोस्मिकृपालुभिः ॥ तान्वंदेयादवाचार्यान्वेदेशमुनिसेवकान् ॥ **इतिश्रीमद्यदुपत्याचार्यपूज्यपादाराधकेनश्रीनिवासेनविरचितामांडूकोपनिषद्भाष्यविवृतिःपदार्थदीपिकाख्यासंपूर्णा ॥**

भा० । एकोपिनिर्विशेषोपिचतुर्धाव्यवहारभाक् । यस्तंवंदेचिदानंदंविष्णुंविश्वादिरूपिणं ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितंमांडूकोपनिषद्भाष्यंसंपूर्णं ॥

अयं ग्रंथः कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण मुंबय्यां निर्णयसागर-
मुद्रणालये मुद्रयित्वा प्रकाशितः. शके १८२६, सन १९०४.

॥ मांडूकश्रीनिवासतीर्थीयविद्वत्तिःसंपूर्णा ॥